1 व्युष्ट, 2 नित्य, 3 निष्क्रमण, 4 प्रवेशन, 5 उपसंक्रमण, 6 तीर्थ, 7 अस्तरण (आस्तरण), 8 संग्राम, 9 संघात, 10 अग्निपद, 11 पीलुमूल (पीलु, मूल), 12 प्रवास, 13 उपवास, 14 संक्रम, 15 तीर्थ. ॥

तेन यथाकथाचहस्ताभ्यां णयतौ ॥ ९८ ॥ पदानि ॥ तेन,यथा,कथाच,हस्ताभ्याम्, णयतौ ॥

वृत्तिः । दीयते कार्यमिति वर्त्तते । तेनेति तृतीयासमर्थाभ्यां यथाकथाचहस्तशब्दाभ्यां यथासंख्यं णयतौ प्रत्ययौ भवतः ।

98. The affix ण (±—अ) and यत् come respectively after the words yathâ-kathâ-cha, and hasta, being in the third case in construction, having the sense of what is " given or is done in this way or with this".

The words दीयते and कार्यं apply to both; the rule of यथासंख्य: (I. 3. 10) not applying to it. The word यथाकथाच is an Indeclinable, meaning contempt. Of course this word cannot take any case-affix, it therefore only gives the sense of third case. As यथा कथाच दीयते कार्यं वा = याथाकथाचम्; हस्तेन दीयते कार्यं वा = हस्त्यम् ॥

संपादिनि ॥ ९९ ॥ पदानि ॥ संपादिनि (ठञ्) ॥

वृत्तिः ॥ तेनेत्येव । तृतीयासमर्थात्संपादिन्यभिधेये ठञ् प्रत्ययो भवति ।

99. The affix ṭhañ (±/—इक) comes after a word in the Instrumental case in construction, in the sense of "fitted for that".

The word सपत्तिः means 'suitable, proper, fit'. The word संपादिन् is formed by adding णिनि to संपद्, the force of the affix being that of necessity (III. 3. 170). As कर्णवेष्टकाभ्यां संपादि मुखं = कार्णवेष्टकिकं मुखं 'a face fit for ear-rings'. वास्त्रयुगिकम् शरीरम् i. e. वस्त्रयुगेन संपादितः शोभते ॥

Digitized by Google

कर्मवेषाद्यत् ॥ १०० ॥ पदानि ॥ कर्म्म-वेषात्-यत् ॥

वृत्तिः ॥ कर्मवेषशब्दाभ्यां तृतीयासमर्थाभ्यां यत्प्रत्ययो भवति संपादिनीत्येतस्मिन्निषये । ठञोपवादः ॥

100. The affix yat (य) comes in the sense of "being fitted with that", after the words karma and vesha, in the third-case in construction.

This debars ṭhañ. कर्मणा संपद्यते = कर्मण्यं शरारम्, वेषेण संपद्यते = वेष्यो नटः ॥ For accent see VI. 1. 213.

तस्मै प्रभवति संतापादिभ्यः ॥ १०१ ॥ पदानि ॥ तस्मै-प्रभवति, सन्तापादिभ्य (ठञ्) ॥

वृत्तिः ॥ तस्माइति चतुर्थीसमर्थेभ्यः संतापादिभ्यः प्रभवतीत्यास्मिन्विषये ठञ् प्रत्ययो भवति ।

101. The affix ṭhañ (±/—इक) comes after the word santâpa &c in the dative construction, in the sense of "what is able to effect that".

The word प्रभवति means 'able, capable'. The dative here has the force of अलम् (II. 3. 16). As, संतापाय प्रभवति = सांतापिकः, साम्राहिकः ॥

1 संताप, 2 संनाह, 3 संग्राम, 4 संयोग, 5 संपराय, 6 संवेशन, 7 संपेष, 8 निष्पेष, 9 सर्ग, 10 निसर्ग, 11 विसर्ग, 12 उपसर्ग, 13 प्रवास, 14 उपवास, 15 संघात, 16 संवेष*, 17 संवास*, 18 संमोदन, 19 सक्तु, 20 मांसौदनाद्विगृहीतादपि, 21 असर्ग. ॥

योगाद्यच्च ॥ १०२ ॥ पदानि ॥ योगात्, यत्, च ॥

वृत्तिः । योगशब्दाद्यत्प्रत्ययो भवति, चकाराद् ठञ्, तस्मै प्रभवतीत्यास्मिन्विषये ।

102. The affix yat (य) is also added in this sense of 'able to effect that', after the word yoga.

Thus योगाय प्रभवति = योग्यः or यौगिकः ॥

कर्मण उकञ् ॥ १०३ ॥ पदानि ॥ कर्म्मणः, उकञ् ॥

वृत्तिः । कर्मशब्दादुकञ् प्रत्ययोभवति तस्य प्रभवतीत्येतस्मिन्नर्थे । ठञो ऽपवादः ।

103. The affix ukañ (±/ उक) comes after the word Karman, in the same sense of 'able to effect that'.

This debars ठञ्. As कर्मणे प्रभवति = कार्मुकं धनुः ॥ This word कार्मुकम् means always a 'bow', and is never employed to designate anything else.

समयस्तदस्य प्राप्तम् ॥ १०४ ॥ पदानि ॥ समयः, तत्, अस्य, प्राप्तम् (ठञ्) ॥

वृत्तिः । समयशब्दात् तदिति प्रथमासमर्थाद् अस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति यत्तत्प्रथमासमर्थं प्राप्तं चेद् भवति ॥

104. The affix ṭhañ (±/—इक) comes after the word samaya in the first case in construction, in the sense of "that has arrived for it".

Digitized by Google

Thus सामयिकं कर्म = 'a work for which the time has come'.

**ऋतोरण् ॥ १०५ ॥ पदानि ॥ ऋतोः, अण् ॥**

वृत्तिः। तदस्य प्राप्तमित्यनुवर्त्तते। ऋतुशब्दात्तादिति प्रथमा समर्थाद्, अस्येति षष्ठ्यर्थे ऽण् प्रत्ययो भवति, तदस्य प्राप्तमित्येतस्मिन् विषये।

वार्त्तिकम्। तदस्य प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् ॥

105. The affix aṇ (±—अ) comes after the word ṛitu, meaning "that has come for it".

As ऋतुःप्राप्तोऽस्य = आर्तवं पुष्पम् (Guṇa by VI. 4. 146) "the flower for which the season has arrived".

*Vârt*:—So also after the words उपवस्त्र &c. As औपवस्त्रम्, प्राशित्रम् ॥

**छन्दसि घस् ॥ १०६ ॥ पदानि ॥ छन्दसि, घस् ॥**

वृत्तिः ॥ ऋतुशब्दाच्छन्दसि विषये घस् प्रत्ययो भवति तदस्य प्राप्तमित्यस्मिन्विषये। अणोपवादः।

106. In the Chhandas, the affix ghas (इय) comes after the word ऋतु in the same sense of 'season has come for it'.

This debars अण्. As अयंते योनिर्ऋत्वियः ॥ Here there is no Guṇa by VI. 4. 146, because by sûtra I. 4. 16, ऋतु before the affix घस् gets the designation of पद, hence the guṇa rule which applies to भ (I. 4. 18) does not apply.

**कालाद्यत् ॥ १०७ ॥ पदानि ॥ कालात्, यत् ॥**

वृत्तिः ॥ कालशब्दाद्यत्प्रत्ययो भवति तदस्य प्राप्तमित्यस्मिन्विषये।

107. The affix yat (यं) comes after the word Kâla, in the same sense of 'time has come for it'.

As काल्यस्तापः, काल्यं शीतं ॥ See VI. 1. 213.

**प्रकृष्टे ठञ् ॥ १०८ ॥ पदानि ॥ प्रकृष्टे ठञ् ॥**

वृत्तिः ॥ कालादित्येव,तदस्येति च। प्राप्तमिति निवृत्तम्। प्रकर्षेण कालो विशेष्यते प्रकर्षे वर्तमानात्कालात्प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति।

108. The affix ṭhañ (±ᐟ—इक) comes after the word Kâla in the first case in construction, in the sense of "long-standing".

As प्रकृष्टो कालोऽस्य = कालिकमृणम् "long-standing debt". कालिकम् वैरम् "long-standing enmity".

In this sûtra काल and तदस्य are understood, but not so the word प्राप्तम् ॥

**प्रयोजनम् ॥ १०९ ॥ पदानि ॥ प्रयोजनम् (ठञ्) ॥**

वृत्तिः ॥ तदिति प्रथमासमर्थादस्येति षष्ठ्यर्थे ठञ् प्रत्ययो भवति, यत्तत्प्रथमासमर्थं प्रयोजनं चेत्तद्भवति ॥

109. The affix ṭhañ (±ᐟ—इक) comes after a word in the first case in construction in the sense of "that whose occasion or purpose is this".

Digitized by Google

As इन्द्रमहः प्रयोजनमस्य = ऐन्द्रमहिकम्, गाङ्गामहिकम् ॥

विशाखाषाढादण्मन्थदण्डयोः ॥ ११० ॥ पदानि ॥ विशाखा-अषाढात्, अण्, मन्थ-दण्डयोः ॥

वृत्तिः ॥ विशाखाषाढाशब्दाभ्यामण् प्रत्ययो भवति तदस्य प्रयोजनमित्येतस्मिन्विषये यथासंख्यं मन्थदण्डयोरभिधेययोः ।

वार्त्तिकम् । चूडादिभ्य उपसंख्यानम् ॥

110. The affix aṇ (±—अ) comes in the sense of 'that whose purpose is this', after the words viśâkhâ, and ashâḍhâ, when the derivative of the first is combined with मन्थ and that of the second with दण्ड ॥

As वैशाखो मन्थः, आषाढो दण्डः ॥

*Vârt*:—So also after the words चूडा &c. As चूडा प्रयोजनमस्य = चौडम्, श्रद्धा प्रयोजनमस्य = श्राद्धम् ॥

अनुप्रवचनादिभ्यश्छः ॥ १११ ॥ पदानि ॥ अनुप्रवचनादिभ्यः, छः ॥

वृत्तिः ॥ अनुप्रवचनादिभ्यः प्रातिपदिकेभ्यश्छः प्रत्ययो भवति तदस्य प्रयोजनमित्यस्मिन्विषये । ठञोपवादः ।

वार्त्तिकम् ॥ विशिपूरिपतिरुहिप्रकृतेर्नात्सपूर्वपदादुपसंख्यानम् ॥ वा० ॥ स्वर्गादिभ्यो यद्वक्तव्यः ॥

वा० ॥ पुण्याहवाचनादिभ्यो लुग्वक्तव्यः ॥

111. The affix Chha (ईय) comes in the same sense of 'that whose purpose is this', after the words अनुप्रवचन &c.

This debars ठञ् ॥ Thus अनुप्रवचनं प्रयोजनमस्य = अनुप्रवचनीयम्, उत्थापनीयम् ॥

*Vârt*:—So also after the derivatives formed by the affix अन (यु) from the radicals विश्, 'to enter', पूर्, 'to fill', पत् 'to fall', and रुह् 'to mount', when preceded by a word. As गृहप्रवेशनीयम्, प्रपापूरणीयम्, अश्वप्रपतनीयम्, प्रासादारोहणीयम् ॥

*Vârt*:—The affix यत् comes after the words स्वर्ग &c. स्वर्गं प्रयोजनमस्य = स्वर्ग्यम्, यशस्यम्, आयुष्यम्, काम्यम्, धन्यम् ॥

*Vârt*:—The affix is elided after the words पुण्याहवाचन &c. As, पुण्याहवाचनं प्रयोजनमस्य = पुण्याहवाचनं, स्वस्तिवाचनं, शान्तिवाचनम् ॥

1 अनुप्रवचन, 2 उत्थापन, 3 उपस्थापन, 4 संवेशन, 5 प्रवेशन, 6 अनुप्रवेशन, 7 अनुवासन, 8 अनुवचन, 9 अनुवाचन, 10 अन्वारोहण, 11 प्रारम्भण, 12 आरम्भण, 13 आरोहण, 14 अनुवेशन, 15 अनुवासन, 16 प्ररोहण ॥

समापनात्सपूर्वपदात् ॥ ११२ ॥ पदानि ॥ समापनात्, सपूर्वपदात् (छः) ॥

वृत्तिः ॥ समापनशब्दात्सपूर्वपदाद्विद्यमानपूर्वपदाच्छः प्रत्ययो भवति तदस्य प्रयोजनमित्येतस्मिन्विषये । ठञोपवादः ।

112. The affix Chha comes in the same sense of "that whose purpose is this", after the word samâpana, when it has a word in composition preceding it.

Digitized by Google

This debars ठञ् ॥ Thus छन्दः समापनं प्रयोजनमस्य = छन्दः समापनीयम्, व्याकरण समापनीयम् ॥ The specific mention of the word पद in the aphorism indicates that the rule will not apply when a word other than a 'pada,' such as the affix 'bahuch,' V. 3. 68. precedes the word Samâpana.

ऐकागारिकट् चौरे ॥ ११३ ॥ पदानि ॥ ऐकागारिकट्, चौरे ॥

वृत्तिः ॥ ऐकागारिकट् इति निपात्यते चौरेऽभिधेये ।

113. The word ऐकागारिकट् is irregularly formed, in the sense of a 'thief'.

The feminine will be in ङीप्. Thus एकागारं प्रयोजनमस्य = ऐकागारिकः fem. °की ॥ This word can be regularly formed by ठञ्, but it will always be restricted to mean a thief. When any other thing is designated, it will not take this affix. Thus एकागारं प्रयोजनमस्य भिक्षाः, here there will be no affixing. The feminine moreover will be in ङीष् ॥ Some say the word is formed by adding the affix इकट् with the irregular Vṛiddhi of the first syllable.

आकालिकडाद्यन्तवचने ॥ ११४ ॥ पदानि ॥ आकालिक ट्, आद्यन्तवचने ॥

वृत्तिः ॥ आकालिकट् इति निपात्यते आद्यन्तवचने । समानकालशब्दस्याकालशब्द आदेशः । आद्यन्तयोश्चैतद्विशेषणम् । इकट् प्रत्ययश्च निपात्यते ।

वार्त्तिकम् । आकालाट् ठंश्च ॥

114. The word âkâlikaṭ is irregularly formed in the sense of "what coincides with the beginning and the end i. e. what lasts only an instant".

The word आकाल is substituted for समानकाल. Thus आकालिकः स्तनयित्नुः 'a thunder lasting for an instant'. आकालिकी विद्युत् "a lightening lasting a twinkle". i. e. whose death is equal to its time of birth or dying as soon as born.

*Vârt*:—The affixes ठन् and ठञ् also come after आकाल; as आकालिका विद्युत् ॥

So far is the governing power of the affix ठञ् V. 1. 18.

तेन तुल्यं क्रिया चेद्वतिः ॥ ११५ ॥ पदानि ॥ तेन, तुल्यं-क्रिया-चेत् वतिः ॥

वृत्तिः ॥ तेनेति तृतीयासमर्थात्तुल्यमित्यर्थे वतिः प्रत्ययो भवति यत्तुल्यं क्रिया चेत्सा भवति ॥

115. The affix vati (वत्) comes after a word in the third case in construction, in the sense of "like that", when the meaning is 'similarity of action'.

As ब्राह्मणेन तुल्यं वर्तते = ब्राह्मणवत्, राजवत् ॥

Why do we say "action"? The affix will not be joined when the similarity is in 'quality'. As पुत्रेणसह स्थूलः "as big as the son", पुत्रेण तुल्यः पिङ्गलः ॥

तत्र तस्येव ॥ ११६ ॥ पदानि ॥ तत्र,तस्य,इव (वतिः) ॥

Digitized by Google

वृत्तिः ॥ तत्रेति सप्तमीसमर्थात्तस्येति षष्ठीसमर्थाच्च इवार्थे वतिः प्रत्ययो भवति ॥

116. The affix vati comes also in the sense of "like what is therein or thereof".

As मथुरायामिव = मथुरावत् 'like that in Mathura'. as मथुरावत् स्रुघ्ने प्राकारः, पाटलिपुत्रवत् साकेते परिखा; देवदत्तस्येव देवदत्तवद् यज्ञदत्तस्य गावः &c.

तदर्हम् ॥ ११७ ॥ पदानि ॥ तद्-अर्हम् ( वतिः ) ॥

वृत्तिः ॥ तदिति द्वितीयासमर्थादर्हमित्येतस्मिन्नर्थे वतिः प्रत्ययो भवति ॥

117. The affix vati comes after a word in the second case in construction, in the sense of "befitting that or suited to that".

As राजानमर्हति = राजवत् पालनम् "the protection as befits a king i.e. as a king should protect". ब्राह्मणवत्, ऋषिवत्, क्षत्रियवत् ॥

उपसर्गाच्छन्दसि धात्वर्थे ॥ ११८ ॥ पदानि ॥ उपसर्गात्-छन्दसि-धात्वर्थे(वति) ॥

वृत्तिः ॥ उपसर्गात्साधने धात्वर्थे वर्त्तमानात्स्वार्थे वतिः प्रत्ययो भवति छन्दसि विषये ॥

118. In the Chhandas, the affix vati is added to an Upasarga (Preposition), in the sense of a verbal root.

As the word उद्वतः and निवतः in the following Rik ( X. 142. 4 ).

यदुद्वतो निवतो यासि बप्सत् पृथगेषि प्रगर्धिनीव सेना ॥ "When thou O Fire ! goest burning high (उद्वतः = उन्नतान्) and low (निवतः = निगतान्) trees &c.

तस्य भावस्त्वतलौ ॥ ११९ ॥ पदानि ॥ तस्य-भावः- त्वतलौ ॥

वृत्तिः ॥ तस्येति षष्ठीसमर्थाद् भाव इत्येतस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः ॥

119. The affixes tva (त्व) and tal (— — त or ता) come after a word in the sixth case in construction, in the sense of "the nature thereof".

As अश्वस्य भावः = अश्वत्वम् or अश्वता, गोत्वम् or गोता ॥

आ च त्वात् ॥ १२० ॥ पदानि ॥ आ-च-त्वात् ( त्व-तलौ ) ॥

वृत्तिः ॥ ब्रह्मणस्त्व इति वक्ष्यति । आ एतस्मात्त्वसंशब्दनाद् यानित ऊर्ध्वमनुक्रमिष्याम, स्तत्र त्वतलौ प्रत्ययावधिकृतौ वेदितव्यौ ॥

120. From this forward as far as the aphorism V. 1. 136, the affixes त्व and तल् bear rule.

Thus in V. 1. 122, त्व and तल् are read, giving the forms पृथुत्वम् and पृथुता &c. This rule is intended to secure admission for these two affixes notwithstanding the bars in the shape of subsequent aphorisms directing the employment of other affixes. These affixes signify, in addition to भाव (nature), कर्म (action) also, in V. 1. 124. The word च in the aphorism is intended to secure their admission notwithstanding the affixes नञ् and स्नञ् (VI. 1. 87). Thus स्त्रियाः भावः = स्त्रैणम्, स्त्रीत्वम्, स्त्रीता 'the nature of a female'. पुंस्त्वम्, पुंस्ता, पौंस्नम् ॥

Digitized by Google

न नञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्यः ॥ १२१ ॥ पदानि ॥ न नञ्पूर्वात्, तत्पुरुषात्, अचतुर-संगत-लवण-वट-बुध-कत-रस-लसेभ्यः ॥

वृत्तिः ॥ इत उत्तरे ये भावप्रत्ययास्ते नञ्पूर्वात्तत्पुरुषान्न भवति चतुरादीन्वर्जयित्वा ॥

121. The affixes denoting 'nature', taught hereafter, do not come after a Tatpurusha compound formed by the negative particle नञ्, with the exception of the following:— chatura, saṅgata, lavaṇa, vaṭa, budha, kata, rasa, and lasa.

Thus the words अपति, अपटु and अरमणीय will have two forms only i. e. अपतित्वम् or अपतिता, अपटुत्वम् or अपटुता, अरमणीयत्वम् or अरमणीयता ॥ While by V. 1. 128, other compounds will have यक् also, as सैनापत्यम् ॥ An exception to this is आविदूर्य (VII. 2. 25), as used by the author himself. Why do we say नञ् पूर्वात् "a Tatpurusha whose first member is नञ्"? Observe बार्हस्पत्यम्, प्राजापत्यम् ॥

Why do we say 'after a Tatpurusha?' Observe, when the word अपटु is a Bahuvrihi compound meaning नास्य पटवः सन्ति, its derivative will be आपटवम्. So also, आलाघवम् ॥

So also the compounds of चतुर &c, with नञ्, e. g. आचतुर्यम्, आसंगत्यम्, आलवण्यम्, आवट्यम्, आबुध्यम्, आकत्यम्, आरस्यम्, आलस्यम् ॥ In some texts, there is युध instead of बुध ॥

पृथ्वादिभ्य इमनिज्वा ॥ १२२ ॥ पदानि ॥ पृथ्वादिभ्यः, इमनिच, वा ॥

वृत्तिः ॥ पृथु इत्येवमादिभ्यः प्रातिपदिकेभ्य इमनिच्प्रत्ययो भवति वा, तस्य भाव इत्येतस्मिन्नर्थे ॥

122. The affix imanich (इमन्) comes optionally in the sense of 'nature thereof', after the words pṛithu &c.

The word वा 'optionally' is employed with the intention of securing admission for the affixes अण् &c. Thus पृथोर्भावः = प्रथिमन् nom. प्रथिमा (पृथु + इमन् = पृथ् + इमन् VI. 4. 155 = प्रथ् + इमन् VI. 4. 161 = प्रथिमा), or पार्थवम् by V. 1. 131. So also म्रदिमा or मार्दवम् ॥ The उ of पृथु and मृदु is elided by VI. 4. 155, and र is substituted for ऋ by VI. 4. 161. Of course, the affixes त्व and तल् come here also as, पृथुत्वम्, मृदुत्वम्, पृथुता, मृदुता ॥

1 पृथु, 2 मृदु, 3 महत्, 4 पटु, 5 तनु, 6 लघु, 7 बहु, 8 साधु, 9 आशु (आसु !), 10 उरु (ऊरु), 11 गुरु, 12 बहुल, 13 खण्ड, 14 दण्ड, 15 चण्ड, 16 अकिंचन, 17 बाल*, 18 होड, 19 पाक, 20 वत्स, 21 मन्द, 22 स्वादु, 23 ह्रस्व, 24 दीर्घ, 25 प्रिय, 26 वृष, 27 ऋजु, 28 क्षिप्र, 29 क्षुद्र, 30 अणु*, 31 वेणु (!).

वर्णदृढादिभ्यः ष्यञ् च ॥ १२३ ॥ पदानि ॥ वर्ण-दृढादिभ्यः, ष्यञ् च ॥

वृत्तिः ॥ वर्णविशेषवाचिभ्यः प्रातिपदिकेभ्यो दृढादिभ्यश्च ष्यञ् प्रत्ययो भवति, चकारादिमनिच, तस्य भाव इत्येतस्मिन्विषये ॥



Digitized by Google

123. The affix shyañ (±/—य) also comes, as well as imanich, after a word denoting colour, and after the words dridha &c, in the sense of 'nature thereof'.

Thus शुक्लस्य भावः = शौक्ल्यम्, शुक्लिमन्, शुक्लत्व, शुक्लता, कार्ष्ण्यम्, कृष्णिमन्, कृष्णत्वम्, कृष्णता; दार्ढ्यम्, द्रढिमन् (nom. °मा), दृढत्वम्, दृढता ॥

The ष् of ष्यञ् shows that the feminine is formed by ङीष् (III. 1. 41). As औचित्यः fem. औचित्ती (VI. 4. 148. and 150).

1 दृढ, 2 वृढ*, 3 परिवृढ, 4 भृश, 5 कृश, 6 वक्र (चक्र), 7 शुक्र*, 8 चुक्र*, 9 आम्र 10 कृष्ट, (आकृष्ट), 11 लवण, 12 ताम्र, 13 शीत, 14 उष्ण, 15 जड, 16 बधिर; 17 पण्डित 18 मधुर, 19 मूर्ख, 20 मूक, 21 वेर्यातलाभमतिमनःशारदानाम् (लाभ is also read The affix shyañ is added to compounds ending in yâta &c preceded by vi, as, वियातत्वम्, वियातता, वियातिमा, वैयात्यं; विलाभत्वं, विलाभता, विलाभिमा, वैलाभ्यं, विमतित्वं, विमतिता, विमतिमा, वैमत्यं and वैमतं (V. 1. 131); विमनस्त्वं, विमनस्ता, विमनिमा, वैमनस्यं and विशारदत्वं, विशारदता, विशारदिमा, वैशारद्यम्) ॥ 22 समो, मतिम नसोः, (The words mati and manas preceded by sam take shyañ, as संमतित्वं, संमतिता, &c). 23 जवन. 24 अम्ल, 25 बाल, 26 तरुण, 27 मन्द, 28 स्थिर, 29 बहुल, 30 दीर्घ ॥

गुणवचनब्राह्मणादिभ्यः कर्माणि च ॥ १२४ ॥ पदानि ॥ गुणवचन-ब्राह्मणादिभ्यः, कर्म्मणि, च (ष्यञ्) ॥

वृत्तिः ॥ गुणमुक्तवन्तो गुणवचनाः गुणवचनेभ्यो ब्राह्मणादिभ्यश्च तस्येति षष्ठीसमर्थेभ्यः कर्मण्यभिधेये ष्यञ् प्रत्ययो भवति । चकाराद् भावे च ।

वार्त्तिकम् ॥ चातुर्वर्ण्यादीनां स्वार्थउपसंख्यानम् ॥

124. The same affix shyañ has after a word expressive of quality, and after Brâhmaṇa &c, the sense of the activity or occupation of something or some one.

The च in the aphorism is employed with the intention of including भाव or "nature". The word कर्म denotes activity. जडस्य भावः कर्म वा = जाड्यम् so also ब्राह्मण्यम्, माणव्यम् ॥

The words भाव and कर्म bear rule upto the end of the chapter. This class of ब्राह्मण &c, is âkṛitigaṇa i. e. the fact of a word belonging to which is known only from the forms met with in writers of authority.

*Vârt*:—The affix does not change the sense in चातुर्वर्ण्य &c, as चत्वार एव वर्णाः = चातुर्वर्ण्यम् ॥ चातुराश्रम्यम्, त्रैलोक्यम्, त्रैस्वर्यम्, षाड्गुण्यम, सैन्यम्, सान्निध्यम्, सामीप्यम्, औपम्यम, सौख्यम् ॥

1 ब्राह्मण, 2 वाडव, 3 माणव, 4 अर्हतो नुम् च, as आर्हन्त्यम् 5 चोर, 6 धूर्त 7 आराधय, 8 विराधय, 9 अपराधय, 10 उपराधय, 11 एकभाव, 12 द्विभाव, 13 त्रिभाव, 14 अन्यभाव, 15 अक्षेत्रज्ञ, 16 संवादिन्, 17 संवेशिन्, 18 संभाषिन्, 19 बहुभाषिन्, 20 शीर्षघातिन् (शीर्षपातिन्), 21 विघातिन्, 22 समस्थ, 23 विषमस्थ, 24 परमस्थ, 25 मध्यमस्थ, 26 अनीश्वर, 27 कुशल, 28 चपल, 29 निपुण, 30 पिशुन, 31 कुतूहल*, 32 क्षेत्रज्ञ, 33 निश्न*, 34 बालिश, 35 अलस, 36 दुष्पुरुष,

Digitized by Google

37 कापुरुष, 38 राजन्, 39 गणपति, 40 अधिपति, 41 गडुल, 42 दायाद, 43 विशस्ति*, 44 विषम*, 45 विपात*, 36 निपात*, 46 सर्ववेदादिभ्यः स्वार्थे, सार्ववेद्यः = सर्ववेदः ॥ 48 चतुर्वेदस्योभयपदवृद्धिश्च, as चातुर्वैद्यम् 49 शौटीर 50 मूक, 51 कपि, 52 विशसि, 53 पिशाच, 54 विशाल, 55 धनपति, 56 नरपति, 57 नित्र 58 निधान 59 विष, 60 स्वभाव, 61 निघातिन्, 62 राजपुरुष, 63 विशाय 64 विशात, 65 विज्ञात, 66 नयात, 67 सुहित, 68 हीन, 69 विदग्ध, 70 उचित, 71 समम, 72 शील, 73 तत्पर, 74 इतर, 75 यथा तथा, 76 पुरस्, 77 पुनः पुनः, 78 अभाक्ष्ण, 79 तरतम, 80 प्रकाम, 81 यथाकाम, 82 निष्कुल, 83 स्वराज, 84 महाराज, 85 युवराज, 86 सम्राज्, 87 अविदूर, 88 अपिशुन, 89 अनृशंस, 90 अयथातथ, 91 अयथापुर, 92 स्वधर्म, 93 अनुकुल, 94 परिमण्डल, 95 विश्वरूप, 96 ऋत्विज्, 97 उदासीन, 98 ईश्वर, 99 प्रतिभू, 100 साक्षि(न्), 101 मानुष, 102 आस्तिक, 103 नास्तिक, 104 युगपद्, 105 पूर्वाधर, 106 उत्तराधर ॥ आकृतिगण ॥

स्तेनाद्यन्नलोपश्च ॥ १२५ ॥ पदानि ॥ स्तेनात्-यत्, नलोपः, च ॥
वृत्तिः ॥ स्तेनशब्दात्षष्ठीसमर्थाद्भावकर्मणोरर्थयोर्यत्प्रत्ययो भवति; नशब्दस्य लोपश्च भवति ॥

125. The affix yat (यं) comes in the sense of "nature thereof or action thereof", after the word stena, in the genitive, and न is elided before this affix.

As स्तेनस्य भावः कर्म वा = स्तेयम् ॥ Some divide the sûtra into two स्तेनात् ष्यम् भवति (2) ततो यत्र लोपश्च as स्तैन्यम् and स्तेयम् ॥

सख्युर्यः ॥ १२६ ॥ पदानि ॥ सख्युः-यः ॥
वृत्तिः ॥ सखिशब्दाद् यः प्रत्ययो भवति भावकर्मणोरर्थयोः ॥
वार्त्तिकम् ॥ दूतवणिग्भ्यां चेति वक्तव्यम् ॥

126. The affix य comes in the sense of 'nature or action thereof', after the word सखि ॥

As सख्यम् 'friendship'.
*Vârt*:—So also after the words दूत and वणिक्, as, दूत्यम् and वणिज्यम् ॥ The word वाणिज्यम् is formed by V. 1. 124, वणिक् belonging to ब्राह्मणादि class.

कपिज्ञात्योर्ढक् ॥ १२७ ॥ पदानि ॥ कपि ज्ञात्योः, ढक् ॥
वृत्तिः ॥ कपिज्ञातिशब्दाभ्यां ढक् प्रत्ययो भवति भावकर्मणोरर्थयोः ॥

127. The affix ḍhak (± —एयं) comes in the sense of 'nature or action thereof', after the words kapi and jñâti.

Thus कपेः भावः कर्म वा = कापेयम्, ज्ञातेयम् ॥ The rule of यथासंख्य (I. 3. 10) does not apply any where under this head.

पत्यन्तपुरोहितादिभ्योयक् ॥ १२८ ॥ पदानि ॥ पत्यन्त-पुरोहितादिभ्यः, यक् ॥
वृत्तिः ॥ पत्यन्तात्प्रातिपदिकात्पुरोहितादिभ्यश्च यक् प्रत्ययो भवतिभावकर्मणोरर्थयोः ॥

128. The affix yak (± — यं) comes in the sense of 'nature or action thereof', after a compound ending with pati, and after purohita &c.

Digitized by Google

Thus सेनापते र्भावः कर्म वा = सैनापत्यम्, गार्हपत्यम्, प्राजापत्यम्, पौरोहित्यम्, राज्यम् ॥

1 पुरोहित, 2 राजासे (असमासे, राजन् असे), 3 ग्रामिक (संग्रामिक), 4 पिण्डिक, 5 सुहित*, 6 बाल, 7 मन्द, 8 खण्डिक, 9 दण्डिक, 10 वर्मिक (वर्मित), 11 कर्मिक, 12 धर्मिक*, 13 शीलिक (शीलिक), 14 सूतिक, 15 मूलिक, 16 तिलक, (तिलिका), 17 अञ्जलिक 18 अञ्जनिक, (अञ्जतिका), 19 ऋषिक, 20 पुत्रिक (पुत्रक), 21 अविक*, 22 छत्रिक, 23 पर्षिक*, 24 पथिक (पथिका), 25 चर्मिक, 26 प्रतिक, 27 सारथि (सारथिक), 28 आस्तिक*, 29 सूचिक, 30 संरक्ष*, 31 सूचक (संरक्षसूचक), 22 नास्तिक*, 33 अजानिक, 34 शाक्वर (शक्वर), 35 नागर*, 36 चूडिक, 37 एषिक, 38 मिलिक, 39 स्तनिक, 40 चूडितिक, 41 कृषिक, 42 पूतिक, 43 पत्रिक, 44 सलनिक, 45 पक्षिक, 46 जलिक, 47 शर्मिक, 48 तिष्यिक, 49 प्रचिक, 50 प्रविक, 51 परिक्षक, 52 पूजनिक, 53 सूचिक, 54 स्वरिक ॥

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्यो ऽञ् ॥ १२९ ॥ पदानि ॥ प्राणभृत्-जाति-वयो वचन-उद्गात्रादिभ्यः, अञ् ॥

वृत्तिः ॥ प्राणभृज्जातिवाचिभ्यः प्रातिपदिकेभ्यो वयोवचनेभ्यः उद्गात्रादिभ्यश्चाञ् प्रत्ययो भवति भावकर्मणोरर्थयोः ॥

129. The affix añ ( +'—अ ) comes in the sense of 'nature or action thereof', after class names of animals, and words expressing age, as well as after udgâtṛi &c.

Thus अश्वस्य भावः कर्म वा = आश्वम्, औष्ट्रम्, कौमारम्, कैशोरम्, औद्गात्रम्, औन्नेत्रम् ॥

1 उद्गातृ, 2 उन्नेतृ, 3 प्रतिहर्तृ, 4 प्रशास्तृ, 5 होतृ, 6 पोतृ, 7 हर्तृ (कर्तृ), 8 रथगणक 9 पत्तिगणक (पक्षिगणक पत्रिगणक), 10 सुष्टु, 11 दुष्टु, 12 अध्वर्यु, 13 वधू, 14 सुभग मन्त्रे ॥ In the Mantra literature subhaga takes अञ्, as महते सैभगाय; sometimes there is no अञ्, as सौभाग्य मस्यै दत्वाव ॥ .

हायनान्तयुवादिभ्योऽण् ॥ १३० ॥ हायनान्त-युवादिभ्यः, अण् ॥

वृत्तिः ॥ हायनान्तेभ्यः प्रातिपदिकेभ्यो युवादिभ्यश्चाण् प्रत्ययो भवति भावकर्मणोरर्थयोः ॥
वार्त्तिकम् ॥ श्रोत्रियस्य यलोपश्च वाच्यः ॥

130. The affix aṇ ( + — अ ) comes in the sense of 'nature or action thereof', after compounds ending in hâyana, and after yuvana &c.

Thus द्विहायनस्य भावः कर्म वा = द्वैहायनम्, त्रैहायनम् ; यौवनम्, स्थाविरम् ॥

*Vârt:*—The य of श्रोत्रिय is elided, as श्रोत्रियस्य भावः कर्म वा = श्रोत्रम् ॥

1 युवन्, 2 स्थविर, 3 होतृ, 4 यजमान, 5 पुरुषासे ( पुरुष असमासे ), 6 भ्रातृ ( भातृ ), 7 कुतुक ( कतक ), 8 श्रमण ( श्रणम ), 9 कटुक*, 10 कमण्डलु, 11 कुस्त्री, 12 सुस्त्री, 13 दुःस्त्री, 14 सुहृदय 15 दुर्हृदय, 16 सुहृद्, 17 दुर्हृद्, 18 सुभ्रातृ, 19 दुर्भ्रातृ, 20 वृषल, 21 परिव्राजक, 22 सब्रह्मचारिन्, 23 अनृशंस, 24 हृदयासे ( हृदय असमासे ), 25 कुशल, 26 चपल, 27 निपुण, 28 पिशुन, 29 कुतूहल, 30 क्षेत्रज्ञ, 31 श्रोत्रियस्य यलोपश्च, 32 यातृ, 33 कृतक, 34 कुचुक, 35 कन्दुक, 36 मिथुन, 37 कुन्त्री, 38 मधुर, 39 कितव, 40 पोत. ॥

Digitized by Google

इगन्ताच्च लघुपूर्वात् ॥ १३१ ॥ इगन्तात्-च-लघुपूर्वात् (अण्) ॥

वृत्तिः ॥ इगन्ताच्च लघुपूर्वादण् प्रत्ययो भवति भावकर्मणोः ॥

131. The affix aṇ (±—अ) comes in the sense of 'nature or action there of', after a stem ending in इक् (इ, ई, उ, ऊ or ऋ or ऌ), when the preceding syllable is prosodially light.

Thus शुचेर्भावः कर्म वा = शौचम्, मौनम् (मुनि), नागरम् (नगर), हारितकम् (हरीतकी) पाटवम् (पटु), लाघवम् (लघु). Why do we say लघुपूर्वात् 'the preceding syllable being light'? Observe कण्डूत्वम्, पाण्डुत्वम् ॥ Why काव्यम् from कवि? The word कवि takes ष्यञ् as belonging to Brâhmaṇâdi class V. 1. 124.

*N. B.* The word anta in the Sûtra may will be dispensed with. The aphorism laghupûrvâd ikah will give the same meaning.

योपधाद्गुरूपोत्तमाद्वुञ् ॥ १३२ ॥ पदानि ॥ योपधात्-गुरु-उपोत्तमात्-वुञ् ॥

वृत्तिः ॥ त्रिप्रभृतीनामन्तस्य समीपमुपोत्तमम् । गुरूपोत्तमम् यस्य तद्गुरूपोत्तमम् । यकारोपधाद्गुरूपोत्तमाद्-वुञ् प्रत्ययो भवति भावकर्मणोः ॥

वार्त्तिकम् ॥ सहायाद्वेति वक्तव्यम् ॥

132. The affix vuñ (+/—अक) comes in the sense of 'nature or action there of', after a polysyllabic stem whose penultimate letter is य्, and whose penultimate syllable is prosodially heavy.

The word उपोत्तमं means the last syllable but one in a word of three syllables or more. That word whose penultimate syllable is गुरु 'heavy', is called गुरूपोत्तमम्: the योपधा means 'having penutimate य्'.

Thus रामणीयकम् from रमणीय, वासनीयकं from वसनीय ॥

Why do we say "the penultimate letter being य्"? Observe वैमानत्वं from विमान ॥

Why do say गुरूपत्तिम "the penultimate syllable being heavy"? Witness क्षत्रियत्वम् ॥

*Vârt:*—Optionally so after the word सहाय, as, साहायकम् and साहाय्यम् ॥

The words उपोत्तम and उपधा should be distinguished: the first means penultimate *syllable* (implying thereby the word is of more than two syllables), and the second means penultimate *letter.*

द्वन्द्वमनोज्ञादिभ्यश्च ॥ १३३ ॥ पदानि ॥ द्वन्द्व-मनोज्ञादिभ्यः,च (वुञ्) ॥

वृत्तिः ॥ द्वन्द्वसंज्ञकेभ्यो मनोज्ञादिभ्यश्च वुञ् प्रत्ययो भवति भावकर्मणोः ॥

133. The affix vuñ comes in the sense of 'nature or action there of', after a dvandva compound and after the words manojña &c.

Digitized by Google

Thus गोपालपशुपालानां भावः कर्म वा – गोपालपशुपालिका, शैष्योपाध्यायिका, कौत्सकुशिकिका, मानोज्ञकम्, काल्याणकम् ॥

1 मनोज्ञ, 2 प्रियरूप, 3 अभिरूप, 4 कल्याण, 5 मेधाविन्, 6 आढ्य, 7 कुलपुत्र, 8 छान्दस, 9 छात्र, 10 श्रोत्रिय, 11 चोर, 12 धूर्त, 13 विश्वदेव (वैश्वदेव), 14 युवन्, 15 कुपुत्र*, 16 ग्रामपुत्र, 17 ग्रामकुलाल*, 18 ग्रामषण्ड (ग्रामखण्ड), 19 ग्रामकुमार, 20 सुकुमार, 21 बहुल, 22 अवश्यपुत्र (अवश्य); 23 अमुष्यपुत्र, 24 अमुष्यकुल, 25 सारपुत्र*, 26 शतपुत्र, 27 कुशल, 28 महोपुरुष. ॥

गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ॥ १३४ ॥ पदानि ॥ गोत्र-चरणात्, श्लाघा-अत्याकार-तद्-अवेतेषु (वुञ्) ॥

वृत्तिः ॥ गोत्रवाचिनश्चरणवाचिनश्च प्रातिपदिकाद् वुञ् प्रत्ययो भवति प्रत्येकं भावकर्मणोरर्थयोः श्लाघादिषु विषयभूतेषु ॥

134. The affix vuñ comes in the sense of 'nature or action thereof' after a family-name (Gotra), and after the Name of a Vedic School, when one boasts thereby, or manifests his contempt thereby, or when it means one who has attained that (or has come for an inspection or inquiring thereof).

The word श्लाघा means boasting; अत्याकार means 'contempt', तद् अवेतः means तद्प्राप्तः 'who has gained that', or तज्ज्ञः 'who inquires that'. The word तत् refers to गोत्र and चरण ॥ The word तदवेतः means "who has obtained that or who has known that".

To take first श्लाघा as गार्गिकया श्लाघते or काठिकया श्लाघते "boasts of belonging to the family of Garga, or the school of Kaṭha". To take अत्याकारः, as, गार्गिकयात्याकुरुते, काठिकयात्यकुरुते "he manifests contempt upon another, because of his belonging to the clan of Garga or School of Kaṭha". To take तदवेता as, गार्गिकामवेतः, काठिकामवेतः – प्राप्तः or अवगतवान् ॥

Why do we say "when it means boasting &c" Observe गार्ग्यत्वम्, काठत्वम्॥ The य of गार्ग्य is elided in the above examples by VI. 4. 148 & VI. 4. 151.

होत्राभ्यश्छः ॥ १३५ ॥ पदानि ॥ होत्राभ्य छः ॥

वृत्तिः ॥ होत्राशब्द ऋत्विग्विशेषवचनः ऋत्विग्विशेषवाचिभ्यश्छः प्रत्ययो भवति भावकर्मणोः ॥

135. The affix chha (ईय) comes in the sense of 'nature or action thereof', after words expressing Hotrâ priests.

Thus अच्छावाकीयम्, मैत्रावरुणीयम्, ब्राह्मणाच्छंसीयम्, आग्नीध्रीयम्, प्रातिप्रस्थात्रीयम्, नेष्ट्रीयम्, पोत्रीयम् ॥ होत्राभ्यः is plural to prevent application of I. 1. 68. therefore the rule does not apply to the word-form 'hotrâ' derived from हु + त्रन meaning a ṛitorj.

Digitized by Google

ब्रह्मणस्त्वः ॥ १३६ ॥ पदानि ॥ ब्रह्मणः-त्व ॥

वृत्तिः ॥ होत्राभ्य इत्यनुवर्त्तते । ब्रह्मन्शब्दाद्धोत्रावाचिनस्त्वः प्रत्ययो भवति भावकर्मणोः; छस्यापवादः ॥

136. The affix tva (त्व) comes in the sense of 'nature or action thereof', after the word Brahmaṇ, denoting a kind of Hotrâ priest.

This debars छ. Thus ब्रह्मणो भावः कर्म वा = ब्रह्मत्वम् ॥ This debars तल् ॥ When ब्रह्मण् means a Brâhman, by caste, we have ब्रह्मत्वम् or ब्रह्मता ॥ So much for the province of the affixes नञ् and स्नञ् (IV. 1. 87).

Digitized by Google

ओ३म् ।

# अथ पञ्चमध्यायस्य द्वितीयः पादः ।

## BOOK FIFTH

### CHAPTER SECOND

**धान्यानां भवने क्षेत्रे खञ् ॥ १ ॥ पदानि ॥ धान्यानाम्-भवने-क्षेत्रे-खञ् ॥**

**वृत्तिः ॥ निर्देशादेव समर्थविभक्तिः । धान्यविशेषवाचिभ्यः षष्ठीसमर्थेभ्यो भवनेभिधेये खञ् प्रत्ययो भवति, यत्तद्भवनं क्षेत्रं भवति ॥**

1. The affix khañ (±′—ईन) comes after the name of any particular corn, being in genitive case in construction, in the sense of a place of growing, when that place is a field.

According to Böhtlingk, the Sûtra should be thus translated. "To a corn-name is added ईन, to express the fields in which the corn grows". According to Ballantyne, it is translated "when we speak of a place for grain, or a field of it, there may be the affix khañ".

The word धान्यानां 'of grains', shows that the word in constructiou should be in the genitive case. The plural number shows that the affix is not to be added to the word-form धान्य, but to words which denote various kinds of dhânya (I. 1. 63). भवन means 'the place where a thing is produced or grows (भवन्ति जायन्ते)' ॥

Thus मुद्गानां भवनं क्षेत्रं = मौद्गीनम्, कौद्रवीणम्, कौलत्थीनम् ॥

Why do we say "of grains"? There will be no affixing in a case like this तृणानां भवनं क्षेत्रं ॥

Why do we say "when it is a field"? Observe मुद्गानां भवनं कुशूलं 'a granary where kidney-beans grow'.

**व्रीहिशाल्योर्ढक् ॥ २ ॥ पदानि ॥ व्रीहि-शाल्योः-ढक् ॥**

**वृत्तिः ॥ व्रीहिशालिशब्दाभ्यां ढक् प्रत्ययो भवति भवने क्षेत्रे ऽभिधेये खञोऽपवादः ॥**

2. The affix ḍhak (±—एयं) comes in the above sense of 'a place of growing, when it is a field', after the words व्रीहि and शालि ॥

Thus व्रीहीनां भवनं क्षेत्रं = व्रैहेयम्, शालेयम् 'a field fit for growing rice'.

यवयवकषष्टिकाद्यत् ॥ ३ ॥ पदानि ॥ यव-यवक-षष्टिकात्, यत् ॥

वृत्तिः ॥ यवादिभ्यः शब्देभ्यो यत्प्रत्ययो भवति भवने क्षेत्रे ऽभिधेये खञोपवादः ॥

3. The affix yat (यं or ⊥य) comes in the same sense of 'a place for growing, it being a field', after the words yava, yavaka, and shashṭika.

This debars खञ् ॥ Thus यवानां भवनं क्षेत्रं = यव्यम्, यवक्यम्, षष्टिक्यम् ॥ See VI. 1. 213 for accent.

विभाषा तिलमाषोमाभङ्गाणुभ्यः ॥ ४ ॥ पदानि ॥ विभाषा,तिल-माष-उमा-भङ्गा-अणुभ्यः( यत् ) ॥

वृत्तिः ॥ तिल माष उमा भङ्गा अणु इत्येतेभ्यो विभाषा यत्प्रत्ययो भवति भवने क्षेत्रे ऽभिधेये ॥

4. The affix yat comes, in the sense of 'a place for growing, it being a field', optionally after the words tila, mâsa, umâ, bhangâ and aṇu.

The affix khañ will come in the alternative. Thus तिल्यम् or तैलीनम् 'a field for growing sesamum', माष्यम् or माषीणम् 'a field for growing beans', उम्यम् or औमीनम् 'a field of linseed', भङ्ग्यम् or भाङ्गीनम् 'a field of hemp', अणव्यम् or आणवीनम् 'a field for small grain'.

सर्वचर्मणः कृतः खखञौ ॥ ५ ॥ पदानि ॥ सर्व-चर्मणः-कृतः-खखञौ ॥

वृत्तिः ॥ सर्वचर्मन्शब्दात्तृतीयासमर्थात्कृत इत्यस्मिन्नर्थे खखञौ प्रत्ययौ भवतः ॥

5. The affix kha (ईन) and khañ (+'—ईन) come in the sense of "wholly made thereof", after the word sarva-charman.

The word सर्व is here a part of the sense of the affix, and joins with the word कृतः, and not with चर्मन्. The compounding is in fact made by the affix. Thus सर्वचर्मणकृतः = सर्वचर्मीणः or सार्वचर्मीणः "made wholly of leather."

यथामुखसंमुखस्य दर्शनः खः ॥ ६ ॥ पदानि ॥ यथामुख-सम्मुखस्य,दर्शनः,खः ॥

वृत्तिः ॥ यथामुखशब्दात्संमुखशब्दात्षष्ठीसमर्थाद्दर्शन इत्येतस्मिन्नर्थे खः प्रत्ययो भवति ॥

6. The affix kha (ईन) comes in the sense of 'a mirror', after the words yathâmukha, and sanmukha being in the 6th case in construction.

The word दर्शनः means that in which something is seen, such as, looking glass, mirror &c, which reflect things. The word यथामुख is an Avyayîbhâva compound, the meaning of यथा being that of likeness II. 1. 6. Thus यथामुखं दर्शनः =



Digitized by Google

यथामुखीनः 'showing or reflecting the likeness of the face'—a mirror. सर्वस्य मुखस्य दर्शनः = सम्मुखीनः 'showing or reflecting the whole face'—a looking-glass.

तत्सर्वादेः पथ्यङ्गकर्मपत्रपात्रं व्याप्नोति ॥ ७ ॥ पदानि ॥ तत्-सर्वादेः, पथि-अङ्ग कर्म-पत्र-पात्रम्, व्याप्नोति (खः) ॥

वृत्तिः ॥ तदिति द्वितीया समर्थविभक्तिः । व्याप्नोतीति प्रत्ययार्थः । परिशिष्टः प्रकृतिविशेषणम् ॥ सर्वादेः प्रातिपदिकात् पथि अङ्ग कर्मन् पत्र पात्र इत्येवमन्ताद् द्वितीयासमर्थाद्व्याप्नोतीत्यस्मिन्नर्थे खः प्रत्ययो भवति ।

7. After the words pathi, aṅga, karman, patra or pâtra, preceded by sarva, being in the second case in construction, the affix kha (ईन) comes in the sense of "what pervades or fills the whole of that".

Thus सर्वपथं व्याप्नोति = सर्वपथीनोरथः; सर्वाङ्गीणस्तापः, सर्वकर्मीणः पुरुषः, सर्वपत्रीणः सारथिः, सर्वपात्रीण ओदनः ॥

आप्रपदं प्राप्नोति ॥ ८ ॥ पदानि ॥ आप्रपदम्-प्राप्नोति (खः) ॥

वृत्तिः ॥ प्रपदमिति पादस्याग्रमुच्यते । आङ्मर्यादायां तयोरव्ययीभावः । आप्रपदशब्दात्तदिति द्वितीयासमर्थात्प्राप्नोतीत्यस्मिन्नर्थे खः प्रत्ययो भवति ॥

8. The affix kha (ईन) comes after the word âprapada, in the sense of "reaching thereto".

The word प्रपद means the 'top of the foot'. आ means "upto". आप्रपद is an Avyayibhâva compound meaning 'to the top of the foot'. Thus आप्रपदं प्राप्नोति = आप्रपदीनः पटः 'cloth reaching to the end of the feet', i. e. showing the width of the cloth by comparison with the body.

अनुपदसर्वान्नायानयं बद्धाभक्षयतिनेयेषु ॥ ९ ॥ पदानि ॥ अनुपद-सर्वान्न-अयानयं, बद्धा-भक्षयति-नेयेषु (खः) ॥

वृत्तिः ॥ अनुपदादिभ्यः शब्देभ्यस्तदिति द्वितीयासमर्थेभ्यो यथासंख्यं बद्धा भक्षयति नेय इत्येतेष्वर्थेषु खः प्रत्ययो भवति ॥

9. The affix kha comes after the words anupada, sarvânna, and ayânaya, being in the second case in construction, in the senses of 'so bound', 'eating that', and 'to carry thereto' respectively.

Thus अनुपदं बद्धा = अनुपदीना 'a kind of shoe'; this word is always feminine. The force of अनु here is that of 'length' or 'likeness'. That is 'a shoe of the measure of a foot'. So सर्वान्नानि भक्षयति = सर्वान्नीनोभिक्षुः 'a mendicant who eats the whole food'. So also अयानयीनः शारः 'a chessman or piece that is taken to the position on the chess called ayânaya'. The word अयानय is compounded of two words अय, meaning 'going from right to left', and अनय 'from left to right',

Digitized by Google

and it means a particular position in which the pieces moving from right to left and left to right cannot move further, and attack the other pieces.

According to some अयानयीन is the name of the front pieces in ones own row of chess-men. A piece which moves only in one side, does not admit of this affix. The piece which is carried from one side to another, admits of this affix. Others move only in one direction अय or अनय, but not both. Kaiyyata: यस्तु शार एक पार्श्व एव संचरति तत्र न भवति प्रत्ययो, यो हि शारः पार्श्वात् पार्श्वान्तरमानीयते, स एव अयानयं नीयते, अन्यास्तु अयमेव नीयते, अनयमेव नीयते वा ॥

परोवरपरम्परपुत्रपौत्रमनुभवति ॥ १० ॥ पदानि ॥ परोवर-परम्पर-पुत्रपौत्रम्, अनुभवति ( खः ) ॥

वृत्तिः ॥ परोवर परम्पर पुत्रपौत्र इत्येतेभ्यस्तदिति द्वितीयासमर्थेभ्यो ऽनुभवतीत्यस्मिन्नर्थे खः प्रत्ययो भवति ॥

10. The affix kha comes in the sense of "who witnesses or experiences that", after the words parovara, parampara and putrapautra, in the second case in construction.

The word परोवर is compounded of पर and अवर the ओ in रो being irregular, the compounding being caused by the affix. परांश्चावरांश्च अनुभवति = परोवरीणः "who lives to see high and low". The word परम्पर is compounded of पर and परतर, the compounding being caused by the affix. As, परांश्च परतरांश्चानुभवति = परम्परीणः ॥ Similarly पुत्रपौत्रीणः ॥

The word परम्पर is a separate word as well, not formed by or admitting this affix. As मन्त्रिपरम्परा मन्त्रं भिनत्ति ॥

अवारपारात्यन्तानुकामं गामी ॥ ११ ॥ पदानि ॥ अवारपार-अत्यन्त-अनुकामं, गामी ( खः ) ॥

वृत्तिः ॥ अवारपार अत्यन्त अनुकाम इत्येतेभ्यो द्वितीयासमर्थेभ्यो गामीत्येतस्मिन्नर्थे खः प्रत्ययो भवति ॥
वार्त्तिकम् ॥ विपरीताच्च ॥

11. The affix kha comes in the sense of "who purposes to go", after the words avârapâra, atyanta, and anukâma, being in the accusative case in construction.

The word गामी means 'गमिष्यति', see III. 3. 3. The genitive case is prohibited by II. 3. 70: the word गामी governing the accusative. Thus अवारपारं गामी = अवारपारीणः ॥

*Vârt:*—So also when the words are reversed. As पारावारीणः ॥ So also when the words are taken separately as, अवारीणः and पारीणः ॥

So also अत्यन्तं गामी = अत्यन्तीनः = भृशं गन्ता ॥ As अनुकामीनः = यथेष्टं गन्ता ॥

समांसमां विजायते ॥ १२ ॥ पदानि ॥ समांसमां-विजायते ॥

वृत्तिः ॥ समांसमामिति वीप्सायां सुबन्तसमुदायः प्रकृतिः । विजायते गर्भं धारयतीति प्रत्ययार्थः । गर्भधारणेन सकलापि समा व्याप्यत इति अत्यन्तसंयोगे द्वितीया ॥

वार्त्तिकम् ॥ पूर्वपदे सुपो ऽलुग्वक्तव्यः ॥ वा० ॥ अनुत्तरपदस्थस्य च वा यलोपो वक्तव्यः ॥

Digitized by Google

12. The affix kha comes after the word samâmsamâm in the sense of 'who bears in the womb'.

The word विजायते means गर्भे धारयति 'who bears in the womb'. This verb governs the accusative of time समांसमां by II. 1. 29. Thus समांसमां विजायते = समांसमीना गौः, समांसमीना वडवा ॥

*Vârt*:—According to others the aphorism means 'the affix comes in the sense of to give birth to or to get a young". i. e. विजायते = गर्भमोचनं ॥ According to them, the verb governs the locative: समायां समायां विजायते = समांसमीना, the य् of the first समायां being elided, the rest of the vibhakti (आम्) remaining. The word will mean "an animal that gives birth to a young one every year".

*Vârt*:—Sometime there is no affixing, but the whole sentence is to be used to express this meaning, or the य् only of both members is to be elided and a sentence formed. As समां समां विजायते or समयां समयां विजायते ॥

अद्यश्वीनावष्टब्धे ॥ १३ ॥ पदानि ॥ अद्यश्वीन-अवष्टब्धे ॥

वृत्तिः ॥ विजायतइति वर्त्तते । अद्यश्वीन इति निपात्यते अवष्टब्धे विजने । आसन्ने प्रसवे । आविदूर्ये हि मूर्धन्यो विधीयते, अवाचालम्बनाविदूर्ययोरिति ॥

13. The word adyaśvînâ is anomalous, meaning "a female near delivery".

The word विजायते is understood here The word अवष्टब्ध means 'imminent, near'. It is formed by अव + स्तंभ + क्त, the स् being changed to ष् by VIII. 3. 68. Thus अद्य वा श्वो वा विजायते = अद्यश्वीना गौः "a cow likely to give birth to-day or to-morrow". So also अद्यश्वीना वडवा ॥

Some do not read विजायते into the sûtra, which then means "The word adyaśvîna is irregularly formed meaning imminent". As अद्यश्वीनं मरणं 'imminent death'. अद्यश्वीनो वियोगः 'separation likely to take place to-day or to-morrow'.

आगवीनः ॥ १४ ॥ पदानि ॥ आगवीन ॥

वृत्तिः ॥ आगवीन इति निपात्यते । आङ्पूर्वाद् आ तस्य गोः प्रतिपादनात् कर्मकारिणि खः प्रत्ययो निपात्यते ॥

14. The word âgavîna is irregularly formed.

This word is formed by adding ख to the word गो preceded by the preposition आ, as आगो + ख = आगवानः ॥ The force of the affix is that of 'a servant'. A person who is engaged in business till the return of the cows, i. e. a day-labourer.

अनुग्वलंगामी ॥ १५ ॥ पदानि ॥ अनुगु-अलंगामी (खः)

वृत्तिः ॥ गोः पश्चाद् अनुगु । अनुग्वलंगामीत्यस्मिन्नर्थे खः प्रत्ययो भवति ॥

15. The affix kha comes after the word anugu in the sense of 'who is fit to follow'.

Digitized by Google

Thus the word अनुगु means गोः पश्चात् ॥ Thus अनुगु पर्याप्तं गच्छति = अनुगवीनः 'who is suited or able to follow after the cows' i. e. a cowherd.

अध्वनो यत्खौ ॥ १६ ॥ पदानि ॥ अध्वनः, यत्-खौ ॥

वृत्तिः ॥ तावति द्वितीया समर्थविभक्तिरनुवर्तते । अलंगामीति च प्रत्ययार्थः । अध्वन्शब्दाद् द्वितीयासमर्थादलंगामीत्येतस्मिन्नर्थे यत्खौप्रत्ययौ भवतः ॥

16. The affixes yat (य) and kha (ईन) come after the word adhvan, in the above sense of 'who is fit or able to follow'.

Thus अध्वानमलंगामी = अध्वनीनः or अध्वन्यः 'able to undertake a journey'. By aphorisms VI. 4. 168, 169, the word अध्वन् retains its original form before the affix य and ख, not losing its final अन् which it does before other affixes, by VI. 4. 144.

अभ्यमित्राच्छ च ॥ १७ ॥ पदानि ॥ अभ्यमित्रात्-छ-च (यत् खौ)

वृत्तिः ॥ अभ्यमित्रशब्दाद् द्वितीयासमर्थादलंगामीत्यस्मिन्नर्थे छः प्रत्ययो भवति । चकाराद्यत्खौ च ।

17. The affix Chha (ईय) also as well as yat and kha, comes after the word abhyamitra, in the sense of 'who is able to go'.

The च् draws in यत् and ख. Thus अभ्यमित्रं अलंगामी = अभ्यमित्रीयः, अभ्यमित्र्यः, अभ्यमित्रीणः 'an warrior who valiantly encounters his enemy' = अमित्राभिमुखं सुष्ठु गच्छति ॥

गोष्ठात्खञ् भूतपूर्वे ॥ १८ ॥ पदानि ॥ गोष्ठात्, खञ्, भूतपूर्वे ॥

वृत्तिः ॥ गावस्तिष्ठन्त्यत्रेति गोष्ठम् । गोष्ठशब्देन सन्निहितगोसमूहो देश उच्यते । भूतपूर्वग्रहणं तस्यैव विशेषणम् । गोष्ठशब्दाद्भूतपूर्वोपाधिकात्स्वार्थे खः प्रत्ययो भवति ॥

18. The affix khañ (±/—ईन) comes after the word goshṭha in the sense of 'it formerly had been'.

The word गोष्ठ is a compound of गो + स्था i. e. a cow-pen, it means the place all around a cow-pen. The word भूतपूर्व qualifies it. Thus गोष्ठो भूतपूर्वः = गौष्ठीनो देशः 'a place which was formerly a Goshṭha'. Otherwise when not meaning formerly, we have गोष्ठो वर्तते ॥

अश्वस्यैकाहगमः ॥ १९ ॥ पदानि ॥ अश्वस्य, एकाहगमः ( खञ् ) ॥

वृत्तिः ॥ निर्देशादेव समर्थविभक्तिः । अश्वशब्दात्षष्ठीसमर्थादेकाहगमइत्येतस्मिन्नर्थे खञ् प्रत्ययो भवति ॥

19. The affix khañ comes after the word aśva, in the genitive case in construction, the sense being 'what is travelled over or traversed in one day'.

Digitized by Google

The word अध्वन् being in the sixth case shows the construction it should have before the affix. The एकाहगमः means एकाहेन गम्यते i. e. what is or can be gone over in one day. Thus अध्वस्येकाहगमोऽध्वा = आध्वीनः, as आध्वीनानि शतं पतित्वा = यावन्ति योजनान्येकाहेनाध्वेन गम्यते तावतां शतं गत्वा ॥ सहस्राध्वीने वा इतः स्वर्गो लोकः ॥

शालीनकौपीने अधृष्टाकार्ययोः ॥ २० ॥ पदानि ॥ शालीन कोपीने, अधृष्ट-अकार्ययोः ॥

वृत्तिः ॥ शालीनकौपीनशब्दौ निपात्येते यथासंख्यमधृष्टे ऽकार्ये चाभिधेये अधृष्टो ऽप्रगल्भः । अकार्यमकरणार्हं विरुद्धम् । शालीनकौपीने अधृष्टाकार्ययोः पर्यायो यथाकथं चिद् व्युत्पादयितव्यो ॥

20. The word śâlîna and kaupîna are anomalous, when meaning 'modest' and 'a shameful action' respectively

The word अधृष्ट means 'not proud', अकार्यम् means 'unfit to be done' i. e. an infamous act. The words come from शाला "a hall" and कूप 'a well'. It is not easy to trace any connection between 'modesty' and 'a hall', or between 'shameful' and 'a well'. However some say शालाप्रवेशनमर्हति 'who deserves to enter a hall', = शालीनः, कूपावतारमर्हति 'who deserves to be thrown into a well' = कौपीनः, hence a thing to be concealed, and the dress that conceals it. As शालीनो जडः, कौपीनं पापं ॥

व्रातेन जीवति ॥ २१ ॥ पदानि ॥ व्रातेन, जीवाति ( खञ् ) ॥

वृत्तिः ॥ निर्देशादेव तृतीया समर्थविभक्तिः । व्रातशब्दात्तृतीयासमर्थाज्जीवतीत्यस्मिन्नर्थे खञ् प्रत्ययो भवति । नानाजातीया अनियतवृत्तय उत्सेधजीविनः संघा व्राताः ॥

21. The affix khañ comes after the word vrâta in the third case in construction, the sense being "who leads this life, or who lives by this".

The word व्रात means a multitude or mass composed of various castes, who have no fixed employment, and live by violence, or by bodily labor. व्रातेन जीवति = व्रातीनः 'a person who lives by the labour of his body, not of his brain'.

साप्तपदीनं सख्यम् ॥ २२ ॥ पदानि ॥ साप्तपदीनं, सख्यम् ॥

वृत्तिः ॥ साप्तपदीनमिति निपात्यते सख्ये ऽभिधेये ॥

22. The word sâptapadîna is anomalous, when meaning 'friendship'.

The word साप्तपदीन comes from सप्तपद but the connection of senses is not very clear. It is said सप्तभिः पदैरवाप्यते = साप्तपदीनम् "formed by walking together seven steps or by talking together seven words". The circumambulation of the Fire by the bride and bridegroom in seven steps makes the marri-

Digitized by Google

age irrevocable. साप्तपदीनं seems to have some connection with that. The word साप्तपदीनः or °नं means 'a friend' also; the abstract sense being made applicable by analogy to the person as well.

हैयङ्गवीनं संज्ञायाम् ॥ २३ ॥ पदानि ॥ हैयङ्गवीनम्, संज्ञायाम् (खञ्) ॥

वृत्तिः ॥ हैयङ्गवीनं निपात्यते संज्ञायां विषये । ह्योगोदोहस्य हियङ्गवादेशः, तस्य विकारे खञ् प्रत्ययो भवति संज्ञायाम् ॥

23. The word haiyangavîna is anomalons, when it is a Name.

The word हैयङ्गवीनम् means 'fresh butter'. The word comes from ह्यः 'yesterday' and गो 'cow'. ह्यो गोदोहस्य विकारः 'prepared from yesterday's milk' i. e. "fresh butter". The affix does not come in the sense of any विकार in general. There is no affixing in ह्यो गोदोहस्य विकार when it means उदश्वित् or 'whey'.

तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणब्जाहचौ ॥ २४ ॥ पदानि ॥ तस्य, पाकमूले, पील्वादि, कर्णादिभ्यः, कुणप्-जाहचौ ॥

वृत्तिः ॥ तस्येति षष्ठीसमर्थेभ्यः पील्वादिभ्यः कर्णादिभ्यश्च यथासंख्यं पाकमूलयोरर्थयोः कुणप् जाहच् इत्येतौ प्रत्ययौ भवतः ॥

24. The affixes kuṇap (कुण्) and jâhach (जाह) come after the words pilu &c and karṇa &c respectively, when the senses are respectively 'the fruiting-season of this' and 'the root of this'.

The word तस्य shows that the construction must be genitive. The affix कुणप् comes after पील्वादि words, signifying 'ripening', and the affix जाहच् comes after कर्णादि words signifying the 'root'.

Thus पीलूनां पाकः = पीलुकुणः, कर्कन्धुकुणः, so also कर्णस्य मूलं = कर्णजाहम्, अक्षिजाहम् ॥

1 कर्ण, 2 अक्षि, 3 नख, 4 मुख, 5 केश, 6 पाद, 7 गुल्फ, 8 भ्रू, 9 भृङ्ग (भृङ्ग ! भ्रूभङ्ग), 10 दन्त, 11 ओष्ठ, 12 पृष्ठ. 13 नख, 14 अङ्गुष्ठ. ॥

1 पीलु, 2 कर्कन्धु (°न्धू), 3 शमी, 4 करीर, 5 कुवल, 6 बदर, 7 अश्वत्थ, 8 खदिर. ॥

पक्षात्तिः ॥ २५ ॥ पदानि ॥ पक्षात्, तिः ॥

वृत्तिः ॥ तस्येत्येव । तस्येति षष्ठीसमर्थात्पक्षशब्दात् मूलेऽभिधेये तिः प्रत्ययो भवति ॥

25. The affix ti (ति) comes after the word paksha in the genitive case in construction, in the sense of 'the root of it'.

The word मूल of the last sûtra is drawn into this aphorism; and not the word पाक as well. This is an exceptional case of अनुवृत्ति, generally the whole is drawn and not a portion. Hence arises the following maxim क्वचि-

Digitized by Google

वैकदेशोऽप्यनुवर्तते "Sometimes it also happens that only a part of the words of a rule which are mutually connected is valid in a subsequent rule, while the rest ceases to be valid".

Thus पक्षस्य मूलं = पक्षतिः i. e. प्रतिपत् 'the root or the first day of a Paksha or a fortnight'.

तेन वित्तश्चुञ्चुप्चणपौ ॥ २६ ॥ पदानि । तेन, वित्तः, चुञ्चुप्-चणपौ ॥

वृत्तिः ॥ तेनेति तृतीयासमर्थाद्वित्त इत्येतस्मिन्नर्थे चुञ्चुप् चणप् इत्येतौ प्रत्ययौ भवतः ॥

26. The affixes chuñchup (चुञ्चु) and chaṇap (चण) come after a word in the third case in construction, in the sense of 'celebrated through this'.

The word वित्त means known, illustrious. Thus विद्यया वित्तः = विद्याचुञ्चुः, विद्याचणः, केशचणः ॥ The initial च् in these affixes is not इत् (I. 3. 7).

विनञ्भ्यां नानाञौ नसह ॥ २७ ॥ पदानि ॥ वि-नञ्भ्याम्, ना-नाञौ, नसह ॥

वृत्तिः ॥ वि नञ् इत्येताभ्यां यथासंख्यं ना नाञ् इत्येतौ भवतः । नसहेति प्रकृतिविशेषणम् । असहार्थे पृथग्भावे वर्त्तमानाभ्यां विनञ्भ्यां स्वार्थे नानाञौ प्रत्ययौ भवतः ॥

27. The affixes ना and नाञ् come respectively after the words वि and नञ्, in the sense of 'not being together'.

Thus वि + ना = विना 'without'; नञ् + नाञ् = नाना 'several'.

वेः शालच्छङ्कटचौ ॥ २८ ॥ पदानि ॥ वेः, शालच्, शङ्कटचौ ॥

वृत्तिः ॥ विशब्दात् शालच् शङ्कटच् इत्येतौ भवतः । साधनक्रियावचनादुपसर्गात्स्वार्थे प्रत्ययौ भवतः ॥

28. The affixes śâlach (शाल) and śaṅkaṭach (शंकट) come after the preposition वि, without changing the sense.

Thus विगते शृङ्गे = विशाले, विशंकटे ॥ Thus these words may apply to a cow, as विशालः, विशंकटः ॥ According to some these words are adjectives meaning 'great, large' &c. There is no connection here of sense of base and the affix.

संप्रोदश्च कटच् ॥ २९ ॥ पदानि ॥ सम्-प्र-उदः, च, कटच् ॥

वृत्तिः ॥ सम् प्र उद् इत्येतेभ्यः कटच् प्रत्ययो भवति । चकाराद्वेश्च ॥

वार्त्तिकम् ॥ कटच्प्रकरणेऽलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानम् ॥

वा० ॥ गोष्ठादयः स्थानादिषु पशुनामादिभ्य उपसंख्यानम् ॥

वा० ॥ संघाते कटच् वक्तव्यः ॥ वा० ॥ विस्तारे पटच् वक्तव्यः ॥ वा० ॥ द्वित्वे गोयुगच् ॥

वा० ॥ प्रकृत्यर्थस्य षट्त्वे षड्गवच् ॥ वा० ॥ विकारे स्नेहने तैलच् ॥

वा० ॥ भवनेक्षेत्रे इक्ष्वादिभ्यः शाकटशाकिनौ ॥

29. The affix kaṭach (कट) comes after the words sam, pra, ud, (and vi).

Digitized by Google

The वि is read into the sûtra by virtue of the word च ॥ Thus संकटम्, प्रकटम्, उत्कटम्, विकटम् ॥

*Vârt*:—The affix कटच् comes after अलाबु, तिल, उमा, and भङ्गा in denoting dust thereof. As अलाबुनो रजः = अलाबूकटम्, तिलकटम्, उमाकटम्, भंगाकटम् ॥

*Vârt*:—The affix गोष्ठच् comes after the names of animals, in denoting the places. As गवां स्थानं = गोगोष्ठं, महिषीगोष्ठं, &c.

*Vârt*:—When a flock is denoted, the affix कटच् is added, as अविकटम् ॥

*Vârt*:—When spreading is denoted, the affix is पटच्, and अविपटः ॥

*Vârt*:—When a couple is denoted, the affix is गोयुगच्, as, अश्वगोयुगम्, उष्ट्रगोयुगम् ॥

*Vârt*:—When six is denoted, the affix is षड्गवच्, as, हस्तिषड्गवम्, अश्वषड्गवम् ॥

*Vârt*:—The affix तैलच् comes when it means the oil of it. As एरण्डतैलम्, इंगुदीतैलम्, तिलतैलम् ॥

*Vârt*:—The affixes शाकट and शाकिन denote 'a field where it grows', after the words इक्षु &c. As इक्षुशाकटम्, मूलशाकटम्, इक्षुशाकिनं, मूलशाकिनम् ॥

अवात्कुटारच्च ॥ ३० ॥ पदानि ॥ अवात्,कुटारच्, च ॥

वृत्तिः ॥ अवशब्दात् कुटारच् प्रत्ययो भवति । चकारात् कटच् ॥

30. The affix कुटारच् as well as कटच् comes after the word अव ॥

As अवकुटारम्, अवकटम् 'downwards', 'very deep'.

नते नासिकायाः संज्ञायां टीटञ्नाटज्भ्रटचः ॥३१॥ पदानि ॥ नते, नासिकायाः, संज्ञायाम्, टीटच्-नाटच्-भ्रटचः ॥

वृत्तिः ॥ अवादित्येव । नमनं नतम् । नासिकायाः संबन्धिनि नतेऽभिधेये टीटच् नाटच् भ्रटच् इत्येते प्रत्यया भवन्ति संज्ञायां विषये ॥

Thus पयस्—पयस्विन्, यशस्—यशस्विन् ॥ मायाविन्, मेधाविन्, स्रग्विन् ॥ The word माया being included in व्रीह्यादि class, will take इनि, and ठन् also V. 2. 116. As मायी, मायिकः ॥

बहुलं छन्दसि ॥ १२२ ॥ पदानि ॥ बहुलम्, छन्दसि ( विनिः ) ॥

वृत्तिः ॥ छन्दसि विषये बहुलं विनिः प्रत्ययो भवति मत्वर्थे ।
वार्त्तिकम् ॥ छन्दसि विनिप्रकरणे ऽष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घत्वं चेति वक्तव्यम् ॥
वार्त्तिकम् ॥ मर्मणश्चेतिवक्तव्यम् ॥ वा० ॥ सर्वत्रामयस्योपसंख्यानम् ॥ वा० ॥ शृङ्गवृन्दाभ्यामारकन्वक्तव्यः ॥
वा० ॥ फलबर्हाभ्यामिनज्वक्तव्यः ॥ वा० ॥ हृदयाच्चालुरन्यतरस्याम् ॥
वा० ॥ शीतोष्णतृप्रेभ्यस्तन्न सहतइत्यालुज्वक्तव्यः ॥ वा० ॥ तन्न सहतइति हिमाच्चेलुः ॥
वा० ॥ बलाच्चोलच् ॥ वा० ॥ वातात्समूहे च ॥ वा० ॥ तन् पर्वमरुद्भ्यां वक्तव्यः ॥
वा० ॥ अर्थाच्चासन्निभावे इनिर्वक्तव्यः ॥

122. In the Chhandas, the affix vini is added diversely in the sense of matup.

As अग्ने तेजस्विन् ॥ Sometimes it is not added, as सूर्यो वर्चस्वान् ॥

*Vârt*:—In the Chhandas, the final अ of द्वय, उभय and हृदय is lengthened optionally before विनि; and it comes after अष्ट्रा, मेखला and रुजा also: as अष्ट्रावी, मेखलावी, द्वयावी, उभयावी, रुजावी, हृदयावी ॥

*Vârt*:—So also after मर्म, as मर्मावी ॥

*Vârt*:—Always after आमय, in the sacred as well as secular literature. As आमयावी ॥

*Vârt*:—The affix आरकन् comes after शृङ्ग and वृन्द; as शृङ्गारकः, वृन्दारकः ॥

*Vârt*:—The affix इनच् comes after फल and बर्ह; as फलिनः and बर्हिणः ॥

*Vârt*:—So also after हृदय; the affix चालु comes optionally: as, हृदयालुः, हृदयी, हृदयिकः, हृदयवान् ॥ The च् is इत् by I. 3. 7.

*Vârt*:—The affix आलुच् comes after शीत, उष्ण, and तृप, in the sense of not being able to bear that. As शीतं न सहते=शीतालुः 'shivering from cold'. उष्णालुः, तृपालुः ॥

*Vârt*:—So also after हिम comes the affix एलु in the above sense: as हिमं न सहते=हिमेलुः ॥

*Vârt*:—The affix ऊलच् in the same sense after बल; as बलं न सहते=बलूलः ॥

*Vârt*:—So also after वात; as वातानां समूहः, or वातं न सहते=वातूलः ॥

*Vârt*:—The affix तन् comes after पर्व and मरुत्. As पर्वतः and मरुत्तः ॥

*Vârt*:—The affix इनि comes after अर्थ in the sense of 'not having that', as अर्थी 'a beggar, who has not artha or wealth'. Otherwise अर्थवान् 'rich'. All these are obtained by बहुलः ॥

ऊर्णाया युस् ॥ १२३ ॥ पदानि ॥ ऊर्णायाः, युस् ॥

वृत्तिः ॥ ऊर्णाशब्दाद्युस् प्रत्ययो भवति मत्वर्थे ।

**123. The affix युस् is added to ऊर्णा in the sense of matup, (in the Chhandas).**

The स् of युस् makes the word ऊर्णा a पद (I. 4, 16); the result of which is that rules applicable to भ Bha do not apply; e. g. VI. 1. 148, by which the final इ or ई, अ or आ is elided. Thus ऊर्णायुः ॥ According to some; छन्दसि is to be read in this sûtra. The author of Siddhânta Kaumudî says that this is reasonable; for if yus is added to ûrṇâ in secular literature also, then there was no necessity of this sûtra. The word ûrṇâ could have been read along with aham and śubham in V. 2. 140.

वाचो ग्मिनिः ॥ ११४ ॥ पदानि ॥ वाचः, ग्मिनिः ॥

वृत्तिः ॥ वाक्शब्दात् ग्मिनिः प्रत्ययो भवति मत्वर्थे ।

**124. The affix gmini (ग्मिन्) comes after the word vâch, in the sense of matup.**

Thus वाग्मी, वाग्मिनौ, वाग्मिनः. The affix is not मिन्, for had it been so, the form would have been वाङ्मिन् by VIII. 4. 45 Vârt.

आलजाटचौ बहुभाषिणि ॥ १२५ ॥ पदानि ॥ आलच्-आटचौ, बहुभाषिणि ॥

वृत्तिः ॥ वाक्शब्दात्तथमासमर्थादालच् आटच् इत्येतौ प्रत्ययौ भवतो मत्वर्थे बहुभाषिण्यभिधेये ॥

वार्त्तिकम् ॥ कुत्सितइति वक्तव्यम् ॥

**125. The affixes âlach (आल) and âṭach (आट) come in the sense of matup, after vâch, the word denoting 'a talkative'.**

Digitized by Google

This debars ग्मिन्॥. Thus वाचालः 'garrulous', वाचाटः॥

*Vârt*:—These affixes come when contempt is expressed. An orator (वाग्मी) also talks much, but to the purpose. He will not be called वाचालः or वाचाटः॥

**स्वामिन्नैश्वर्ये ॥ १२६ ॥ पदानि ॥ स्वामिन्, ऐश्वर्य्ये ॥**

वृत्तिः। स्वामिन्निति निपात्यते ऐश्वर्ये गम्यमाने। स्वशब्दादैश्वर्यवाचिनो मत्वर्थे आमिन्प्रत्ययो निपात्यते।

126. The irregularly formed word svâmin denotes 'Sir or Lord'.

The affix आमिन् comes in the sense of lordship after the word स्व॥ Thus स्वमस्यास्ति = ऐश्वर्यमस्यास्ति = स्वामिन्॥ Why do we say when meaning 'Sir', Observe, स्ववान्॥

**अर्शआदिभ्यो ऽच् ॥ १२७ ॥ पदानि ॥ अर्शआदिभ्यः, अच् ॥**

वृत्तिः॥ अर्शस् इत्येवमादिभ्यः प्रातिपदिकेभ्यो ऽच्प्रत्ययो भवति मत्वर्थे॥

127. The affix ach (अ) comes in the sense of matup after the words arśa &c.

Thus अर्शांसि अस्य विद्यन्ते = अर्शसः उरसः &c.॥ After a word denoting a member of the body comes the affix अच्, when defect is meant. As खञ्जः पादोस्यास्ति = खञ्जः, काणः॥ So also after words denoting color, as शुक्लोऽस्यास्ति = शुक्लः पटः॥

1 अर्शस्, 2 उरस्, 3 तुन्द, 4 चतुर, 5 पलित, 6 जटा, 7 घटा, 8 घाटा*, 9 अघ (अभ्र), 10 कर्दम, 11 अम्ल (आम), 12 लवण, 13 स्वाङ्गाद्धीनात्, 14 वर्णात्. आकृतिगण॥

**द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः ॥ १२८ ॥ पदानि ॥ द्वन्द्व-उपताप-गर्ह्यात्-प्राणिस्थात्, इनिः ॥**

वृत्तिः॥ द्वन्द्वः समासः। उपतापो रोगः। गर्ह्यं निन्द्यं, तद्विषयेभ्यः शब्देभ्यः प्राणिस्थार्थवाचिभ्य इनिः प्रत्ययो भवति मत्वर्थे। वा०॥ प्राण्यङ्गान्न॥

128. The affix ini (इन्) comes, in the sense of matup, after a dvandva compound, after the name of a disease, and after anything denoting fault, when the thing is found in a living being.

Thus Dvandva:—कटकवलयिनी 'a woman having a bracelet and a zone', शङ्खनूपुरिणी 'a woman having śankha and nûpur ornaments'. So after diseases:—कुष्ठी 'a leper', किलासी 'a white leper'. So after names of faults:—ककुदावर्ती, काकतालुकी॥

Why do we say 'when found in a living being?' Observe पुष्पफलवान् वृक्षः॥ The affix, according to a Vârtika, does not come after words denoting members of a living body: as, पाणिपादवती॥ The word अतः V. 2. 115, is understood in this sûtra, so that the affix does not come after words not

Digitized by Google

ending in अ; as चित्रकल्माषिकाग्नी ॥ Though Dvandva compounds &c. ending in अ, would have taken इनि by V. 2. 115, the repetition of this affix in the present sûtra shows that Dvandva compounds &c, take only इनि, and not ठन् &c.

**वातातिसाराभ्यां कुक् च ॥ १२९ ॥ पदानि ॥ वात-अतिसाराभ्याम्-कुक्, च ॥**

वृत्तिः ॥ वातातिसारशब्दाभ्यामिनिः प्रत्ययो भवति, तत्संनियोगेन च तयोः कुगागमो भवति ॥ वार्त्तिकम् ॥ पिशाचाच्चेति वक्तव्यम् ॥

129. The augment kuk (क्) comes before इनि, after the words vâta and atisâra.

The words वात and अतिसार being names of diseases, will take इनि by the fore-going sûtra; the present aphorism only teaches the affixing of the augment. Thus वातकी, अतिसारकी ॥ Another reading is अतीसारकी ॥

*Vârt*:—So also after पिशाच, as पिशाचकी वैश्रवणः 'the Kubera'.

This is when the words वात and अतिसार denote diseases. Otherwise, वातवती गुहा ॥

**वयसि पूरणात् ॥ १३० ॥ पदानि ॥ वयसि, पूरणात्, (इनिः) ॥**

वृत्तिः ॥ इनिरनुवर्त्तते । पूरणप्रत्ययान्तात्प्रातिपदिकादिनिः प्रत्ययो भवति मत्वर्थे वयसि द्योत्ये ॥

130. The affix ini comes in the sense of matup, after an ordinal numeral, when age is denoted.

Thus पञ्चमोऽस्यास्ति मासः संवत्सरो वा = पंचमिन् 'five months or years old', as पंचमी उष्ट्रः ॥ Similarly नवमी, दशमी &c. By V. 2. 115 the affix इनि would have come after these words; the present sûtra is a restrictive rule teaching that ठन् does no come in this sense.

Why do we say वयसि 'when age is denoted'? Observe, पंचमवान् ग्रामरागः ॥

**सुखादिभ्यश्च ॥ १३१ ॥ पदानि ॥ सुखादिभ्यः, च, (इनिः) ॥**

वृत्तिः ॥ सुख इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो नियम्यते मत्वर्थे ॥

131. The affix ini comes (to the exclusion of other affixes) in the sense of matup, after the words sukha &c.

Thus सुखिन् nom. सुखी; दुःखिन् &c. When censure is implied, then इन् comes after माला, to the exclusion of मतुप्, as माली ॥

The following is the list of सुखादि word:—

1 सुख, 2 दुःख, 3 तृप्र, 4 कृच्छ्र, 5 आस्र (आस्र), 6 अस्र*, 7 अलीक, 8 करुण (करुणा), 9 सोढ, 10 प्रतीप (प्रमीप), 11 शील, 12 हल, 13 माला क्षेपे, 14 कृपण, 15 प्रणय (प्रणाय) 16 दल*, 17 कक्ष* ॥

**धर्मशीलवर्णान्ताच्च ॥ १३२ ॥ पदानि ॥ धर्म्म, शील, वर्णान्तात्, च, (इनिः) ॥**

वृत्तिः ॥ अन्तशब्दः प्रत्येकमभिसंबध्यते, धर्माद्यन्तात्प्रातिपदिकादिनिः प्रत्ययो नियम्यते ॥

Digitized by Google

132. The affix ini comes in the sense of matup, (to the exclusion of others), after nominal steps ending in dharma, sîla, and varṇa.

Thus ब्राह्मणानां धर्मः = ब्राह्मणधर्मः, सोऽस्यास्ति = ब्राह्मणधर्मी ॥ ब्राह्मणशीलिन्, ब्राह्मणवर्णिन् ॥

हस्ताज्जातौ ॥ १३३ ॥ पदानि ॥ हस्तात्, जातौ, ( इनिः ) ॥

वृत्तिः ॥ हस्तशब्दादिनिः प्रत्ययो नियम्यते मत्वर्थे समुदायेन चेज्जातिरभिधीयते ॥

133. The affix ini comes in the sense of matup, after the word hasta, when a genus is denoted by the word so formed.

Thus हस्तोऽस्यास्ति = हस्तिन् 'elephant'. Why do we say when meaning a जाति 'a genus'? Observe हस्तवान् पुरुषः ॥

वर्णाद्ब्रह्मचारिणि ॥ १३४ ॥ पदानि ॥ वर्णाद्, ब्रह्मचारिणि, ( इनिः ) ॥

वृत्तिः ॥ वर्णशब्दादिनिः प्रत्ययो भवति मत्वर्थे समुदायेन चेद्ब्रह्मचारी भण्यते ॥

134. The affix ini comes in the sense of matup, after the word varṇa, when the word so formed means a Brahmachârin.

Thus वर्णिन् 'a Brahmachârî'. The first three वर्ण or castes, who are entitled to the investiture with sacred thread, and lead the life of a Brahma-student are so called. When the meaning is not of Brahmachârî we have वर्णवान् ॥

पुष्करादिभ्यो देशे ॥ १३५ ॥ पदानि ॥ पुष्करादिभ्यः, देशे, ( इनिः ) ॥

वृत्तिः ॥ पुष्कर इत्येवमादिभ्यः प्रातिपदिकेभ्य इनिः प्रत्ययो भवति समुदायेन चेद्देशो ऽभिधीयते ॥

वार्त्तिकम् ॥ इनिप्रकरणे बलाद्बाहूरुपूर्वादुपसंख्यानम् ॥ वा० ॥ सर्वादेश्चेति वक्तव्यम् ॥

वा० ॥ अर्थाच्चासन्निहिते ॥ वा० ॥ तदन्ताच्चेति वक्तव्यम् ॥

135. The affix ini comes in the sense of matup, after the words pushkara &c, when the word so formed denotes a locality.

Thus पुष्करिणी 'a tank', पद्मिनी &c. Why do we say when 'locality' is expressed? Observe पुष्करवान् हस्ती ॥

*Vârt*:—The affix इन् comes after बल preceded by बाहु or ऊरु, as बाहुबलिन् ऊरुबलिन् ॥

*Vârt*—So also after words preceded by सर्व; as, सर्वधनिन्, सर्वबीजिन्, सर्वकेशी नटः ॥

*Vârt*:—So also after अर्थ when meaning 'not near'; as अर्थिन् meaning अर्थोऽसंनिहितोऽस्य 'distant from wealth'. Otherwise अर्थवान् 'having wealth'.

*Vârt*:—So also after a compound ending in अर्थ, as धान्यार्थी, हिरण्यार्थी ॥

1 पुष्कर, 2 पद्म, 3 उत्पल, 4 तमाल, 5 कुमुद, 6 नड, 7 कपित्थ, 8 बिस, 9 मृणाल, 10 कर्दम,

Digitized by Google

11 वाल्लूक, 12 विगई, 13 करीष, 14 शिरीष, 15 यवास, 16 प्रवाह ( प्रवास ), 17 हिरण्य, 18 कैरव, 19 कल्लोल, 20 तट*, 21 तरंग, 22 पङ्कज*, 23 सरोज*, 24 राजीव*, 25 नालीक*, 26 सरोरुह*, 27 पुटक, 28 अरविन्द*, 29 अम्भोज*, 30 अब्ज*, 31 कमल*, 32 पयस्*, 33 ववस. ॥

बलादिभ्यो मतुबन्यतरस्याम् ॥ १३६ ॥ पदानि ॥ बलादिभ्यः, मतुप्, अन्यतरस्याम् ॥

वृत्तिः । बलादिभ्यः प्रातिपदिकेभ्यो मतुप्प्रत्ययो भवति । अन्यतरस्यांग्रहणेन प्रकृत इनिः समुच्चीयते ।

136. After the nominal-stems bala &c, comes the affix matup optionally, as well as ini.

The affix इनि will come in the alternative. Thus बलवान् or बली (v. बलिन्); उत्साहवान् or उत्साही (v. उत्साहिन्) ॥

1 बल, 2 उत्साह, 3 उद्भास ( उद्भाव ), 4 उवास*, 5 उदास*, 6 शिखा*, 7 कुल, 8 चूडा*, 9 सुल*, 10 कूल*, 11 आयाम, 12 व्यायाम, 13 उपयाम, 14 आरोह, 15 अवरोह, 16 परिणाह, 17 युद्ध, 18 उद्दाम, 19 शिखाबल, 20 मूलमूल, 21 हंस. ॥

संज्ञायां मन्माभ्याम् ॥ १३७ ॥ पदानि ॥ संज्ञायाम्, मन्-माभ्याम्( इनिः ) ॥

वृत्तिः ॥ मन्नन्तात्प्रातिपदिकान्मशब्दान्ताच्च इनिः प्रत्ययो भवति मत्वर्थे, समुदायेन चेत्संज्ञा गम्यते ।

137. After a nominal-stem ending in मन् or म, comes the affix ini, in the sense of matup, when the whole word so formed means a name.

Thus प्रथिमन्+इनि=प्रथिम्+इन् (VI. 4. 144)=प्रथिमिन् fem. प्रथिमिनी ॥ So also दामिनी ॥ Similarly होम, होमिनी, सोमिनी ॥ Why do we say, 'when meaning a name'? Observe, सोमवान्, होमवान् ॥

कंशंभ्यां बभयुस्तितुतयसः ॥ १३८ ॥ पदानि ॥ कं-शंभ्याम्, ब-भ-युस्-ति-तु-त-यसः ॥

वृत्तिः ॥ कंशमिति मकारान्तावुदकसुखयोर्वाचकौ, ताभ्यां ब भ युस् ति तु त यस् इत्येते सप्त प्रत्यया भवन्ति मत्वर्थे ।

138. The seven affixes ba, bha, yus, ti, tu, ta and yas, come in the sense of matup, after कम् 'water and happiness', and शम् 'happiness'.

Thus कम्बः, कम्भः, कंयुः, कन्तिः, कन्तुः, कन्तः, कंयः, शम्बः, शम्भः, शंयुः, शन्तिः, शन्तुः, शन्तः, शंयः ॥

The स् in युस् and यस्, make the stem, a Pada (I. 4. 16), the result of which is that म of कम् and शम् is changed into Ánusvâva before these two affixes by VIII. 3. 23. When denoting a Name, the forms will be कम्वः and शम्वः ॥

तुन्दिवलिवटेर्भः ॥ १३९ ॥ पदानि ॥ तुन्दि-वलि-वटेः, भः ॥

वृत्तिः ॥ तुन्दि वलि वटि इत्येतेभ्यो भः प्रत्ययो भवति मत्वर्थे ॥

Digitized by Google

139. The affix bha (भ) comes in the sense of matup, after tundi, vali and vaṭi.

Thus तुण्डिभः 'having a protuberent belly'. वलिभः and वटिभः ॥ Another form is वलिनः, because वलि is included in the Pâmâdi class V. 2. 100. The forms तुन्दिलः &c, are valid by V. 2. 117.

अहंशुभमोर्युस् ॥ १४० ॥ पदानि ॥ अहंशुभमोः, युस् ॥

वृत्तिः ॥ अहमिति शब्दान्तरमहंकारे वर्त्तते, शुभमित्यव्ययं शुभपर्याय, स्ताभ्यां युस्प्रत्ययो भवति मत्वर्थे ॥

140. The affix yus (यु) comes in the sense of matup, after the word aham 'I', and the indeclinable śubham 'good'.

Thus अहंयुः = अहंकारवान्, 'selfish haughty', शुभंयुः = कल्याणवान् ॥ 'auspicious', The स् of युस् makes the words अहम् and शुभम्, Padas; and म् is changed into Anusvâra (I. 4. 16; VIII. 3. 23). See V. 2. 123.

Digitized by Google

ओ३म् ।

# अथ पञ्चमध्यायस्य तृतीयः पादः ।

## BOOK FIFTH.

### CHAPTER THIRD.

प्राग्दिशो विभक्तिः ॥ १ ॥ पदानि ॥ प्राक्-दिशः, विभक्तिः ॥

वृत्तिः ॥ दिक्शब्देभ्य सप्तमीपञ्चमीप्रथमाभ्य इति वक्ष्यति, प्रागेतस्माद्दिक् संशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामो विभक्तिसंज्ञास्ते वेदितव्याः ।

**1. The affixes taught from this aphorism forward as far as V. 3. 27 (exclusive) are called Vibhakti.**

The affixes herein taught do not change the sense of the word, i. e. they are स्वार्थे affixes which leave to the word their own denotation. The rule IV. 1. 82, extends no further than this, hence the words formed by these affixes do not produce epithets connoting the sense of the primitive and denoting something else.

Thus V. 3. 7 declares, that after the words किम् in the ablative there is the affix तसिल्, as कुतः, ततः यतः ॥

The purpose served by designating these affixes as Vibhakti is (a) to debar the elision of final ल् and म् of the affixes as इत् (I. 3. 4). Thus in the affix दानीम् V. 3. 18, म् is not इत्, had it been so, rule I. 1. 47 would have applied: (b) to regulate the accent of इदम्, thus इदम्+तसिल्=इतः here by VI. 1. 171, the affix तसिल् becomes udâtta by virtue of its being Vibhakti, othewise the accent would have been regulated by the indicatory ल् (VI. 1. 193); (c) to make applicable to these words the rules of त्यदादि, that is, the rules given in the Sûtras VII. 2. 102, and those that follow. Thus त्यद्+तसिल्=त्यतः, the द् being replaced by अ by VII. 2. 102.

The affixes now to be taught being स्वार्थिकाः, the anuvṛitti of समर्थानाम् and प्रथमाद् of IV. 1. 82, does not apply to them. The word वा of IV. 1. 82 however applies here, so that these affixes are optional, thus we may have कुतः or कस्मात्, कुत्र or कस्मिन् ॥.

किंसर्वनामबहुभ्यो ऽद्व्यादिभ्यः ॥ २ ॥ पदानि ॥ किम्-सर्वनाम-बहुभ्यः,अद्व्यादिभ्यः ॥

वृत्तिः ॥ प्राग्दिश इत्येव । किमः सर्वनाम्नो बहुशब्दाच्च प्राग्दिशः प्रत्यया वेदितव्याः ।

वार्त्तिकम् । बहुग्रहणे संख्याग्रहणम् ॥

2. These Prâgdiśîya affixes come after the word kim, and after a stem called sarvanâma, and after bahu; but not after dvi &c.

The words द्वि &c, though सर्वनाम are exempted. Thus कुत्र, कुतः, यतः, यत्र, बहुतः, बहुत्र ॥

Why do we say अद्व्यादि 'not dvi &c'. Observe द्वाभ्याम्, द्वयोः ॥ Why do we say किम् &c? Observe वृक्षात्, वृक्षे &c. The word किम् is a सर्वनाम, but it being included in the dyâdi class, would have been exempted from the operation of this rule had it not been separately mentioned.

*Vârt*:—The word बहु here is a Sankhyâ. Therefore, the affix does not apply here, बह्वोः सूपात्, बह्वो सूपे ॥

इदम इश् ॥ ३ ॥ पदानि ॥ इदमः, इश् ॥

वृत्तिः ॥ प्राग्दिश इत्येव । इदम इश् इत्ययमादेशो भवति प्राग्दिशीयेषु प्रत्ययेषु परतः ।

3. For idam, there is the substitute इश् (इ), when a Prâgdiśîya affix follows.

The word प्राग्दिशः is understood here also. The श् of इश् is indicatory of the substitution of the whole (I. 1. 55). Thus इदम्+ह V. 3. 11, = इह ॥

एतेतौ रथोः ॥ ४ ॥ पदानि ॥ एत-इतौ, र-थोः ॥

वृत्तिः ॥ रेफथकारादौ प्राग्दिशीये प्रत्यये परत इदम एतेतावादेशौ भवतः । इशोपवादः ।

4. The substitutes एत and इत come instead of idam, when a Prâgdiśîya affix beginning with र and थ respectively follows.

This debars इश् ॥ The अ in र is for the sake of euphony. Thus इदम्+र्हिल् = एतर्हि (V. 3. 16); इदम्+थमु = इत्थम् (V. 3. 24).

एतदोऽश् ॥ ५ ॥ पदानि ॥ एतदः, अश् ॥

वृत्तिः ॥ प्राग्दिशइत्येव । एतदः प्राग्दिशीये परतो ऽशित्ययमादेशो भवति ।

5. The substitute अश् comes in the place of एतद् when a Pragdiśîya affix follows.

The श् of अश् causes the replacement of the whole (I. 1. 55). According to Patanjali the substitute is अन् and not अश् ॥ Thus एतद्+तसिल् = अतः V. 3. 7; अत्र V, 3. 10.

*Vârt*:—This sûtra must be divided into two एतदः, and अश्, the mean-

Digitized by Google

ing being. (1) The substitutes एत and इत् come in the place of एतद् when affixes beginning with र् and थ respectively follow, as एतद्+र्हिल=एतर्हि (V. 3. 21) एतद्+थमु=इत्थम्॥ The थ must be the थ of थमु which comes after idam (V. 3. 24) for the application of this rule (1), and not the थ of थाल् (V. 3. 23) before which the substitate will be अथ॥ The word एतद् will take थमु by the implication of this rule. (2) The substitute अथ् replaces एतद् before other Pragdiśiya affixes.

सर्वस्य सो ऽन्यतरस्यां दि ॥ ६ ॥ पदानि ॥ सर्वस्य, सः, अन्यतरस्याम्, दि ॥
वृत्तिः। सर्वस्य स इत्ययमादेशो भवति प्राग्दिशीये दकारादौ प्रत्यये परतो ऽन्यतरस्याम्।

6. The स is substituted opionally for सर्व before a Prâgdiśîya vibhakti beginning with द॥

Thus सर्वदा or सदा॥ When the affix is not Prâgdiśîya, there is no substitution: as, सर्वं ददाति=सर्वदा ब्राह्मणी 'a Brâhmaṇî who gives all'.

पञ्चम्यास्तसिल् ॥ ७ ॥ पदानि ॥ पञ्चम्याः, तसिल् ॥
वृत्तिः॥ पञ्चम्यन्तेभ्यः किंसर्वनामबहुभ्यस्तसिल्प्रत्ययो भवति।

7. The affix (—´तस्) comes after the word kim, a sarvanâma, and bahu, when ending in the ablative case.

As किम्+तसिल्=कु+तस् (VII. 2. 104)=कुतः, यतः, ततः, बहुतः॥

तसेश्च ॥ ८ ॥ पदानि ॥ तसेः, च ॥
वृत्तिः॥ प्रतियोग पञ्चम्यास्तसिः, अपादाने चाहीयरुहोरिति वक्ष्यति। तस्य तसेः किंसर्वनामबहुभ्यः परस्य तसिलादेशो भवति।

8. The affix tasil (—´तस्) is substituted for तस् (V. 4. 44, 45) when kim, a sarvanâma, and bahu follow.

Thus कुतः, यतः, ततः, or बहुत आगतः॥ This substitution is for the sake of accent; and for giving it the designation of vibhakti.

पर्यभिभ्यां च ॥ ९ ॥ पदानि ॥ परि-अभिभ्यां, च (तसिल्) ॥
वृत्तिः। परि अभि इत्येताभ्यां तसिल् प्रत्ययो भवति॥

9. The affix tasil comes after pari and abhi also.

This affix comes when परि means 'all'; and अभि means 'both'. Thus परितः=सर्वतः; 'all round'; अभितः, उभयतः 'on both sides'.

सप्तम्यास्त्रल् ॥ १० ॥ पदानि ॥ सप्तम्याः, त्रल् ॥
वृत्तिः॥ किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यः त्रल् प्रत्ययो भवति।

10. The affix tral (—´त्र) comes after kim, a sarvanâma, and bahu, when ending in a locative.

Thus कुत्र (VII. 2. 104) 'where', तत्र (VII. 2. 102) 'there', बहुत्र 'in many places'.

इदमो हः ॥ ११ ॥ पदानि ॥ इदमः, हः ॥
वृत्तिः॥ इदमः सप्तम्यन्ताद्धःप्रत्ययो भवति। त्रलो ऽपवादः॥

Digitized by Google

11. The affix ह comes after इदम् ending in the locative.

This debars त्रल् ॥ Thus इह (V. 3. 3.) 'here'.

किमो ऽत् ॥ १२ ॥ पदानि ॥ किमः अत् ॥

वृत्तिः ॥ किमः सप्तम्यन्तादत्प्रत्ययो भवति । त्रलोऽपवादः ।

12. The affix अत् (अ) comes after kim ending in the locative.

This debars त्रल् ॥ Thus किम्+अत्=कु+अ (VII. 2. 105)=क as क भोक्ष्यसे 'where will you eat'. क्वाध्येष्यसे। According to some त्रल् also comes, as कुत्र ॥ This is done by drawing the word वा 'optionally' from the next sûtra. So that this sûtra becomes an optional one.

वा ह च च्छन्दसि ॥ १३ ॥ पदानि ॥ वा, ह, च, छन्दसि ॥

वृत्तिः ॥ किमः सप्तम्यन्ताद्वा हः प्रत्ययो भवति छन्दसि विषये । यथाप्राप्तं च ।

13. Optionally the affix ह also comes in the Chhandas, after the word kim in the locative: as well as the other affixes.

Thus कुह (VII. 2. 104), क, कुत्र. As in Rig Veda VIII. 62. 4: कुहस्थः कुहजग्मथुः कुहे श्येनेव पेततुः ॥ 'Where are ye two? Where are you (or did you) going? Where do you fall like eagles?".

इतराभ्योपि दृश्यन्ते ॥ १४ ॥ पदानि ॥ इतराभ्यः, अपि, दृश्यन्ते ॥

वृत्तिः ॥ सप्तमीपञ्चम्यपेक्षमितरत्वम् । इतराभ्यो विभक्तिभ्यस्तसिलादयो दृश्यन्ते ।

14. The above affixes are seen coming after kim, a sarvanama and bahu, ending with other case-affixes also, besides the locative and ablative.

That is to say, the affixes तसिल्, त्रल्, ह &c come after kim &c which are not in the ablative or the locative case. By the employment of the expression 'are seen', it is hinted that this may take place not on every occasion, but only when in juxtaposition with such words as भवत् 'Your Honor', दीर्घायुः 'long-lived', आयुष्मान् 'having long-life', and देवानांप्रियः 'the beloved of the Gods'. Thus:

Nom. ततो भवान् or तत्र भवान्=स भवान् ॥
Acc. तत्र भवन्तम् or ततो भवन्तम्=तं भवन्तम् ॥
Ins. तत्र भवता or ततो भवता=तेन भवता ॥
Dat. ततो भवते or तत्र भवते=तस्मै भवते ॥
Abt. ततो भवतः or तत्र भवतः=तस्मात् भवतः ॥
Gen. ततो भवतः or तत्र भवतः=तस्य भवतः ॥
Loc. ततो भवति or तत्र भवति=तस्मिन् भवति ॥

Digitized by Google

Similarly with the words दीर्घायुः, आयुष्मान् and देवानां प्रियः ॥

सर्वैकान्यकिंयत्तदः काले दा ॥ १५ ॥ पदानि ॥ सर्व, एक, अन्य, किम्, यत्, तदः, काले, दा ॥

वृत्तिः ॥ सप्तम्या इति वर्त्तते, न त्वितराभ्य इति । सर्वादिभ्यः प्रातिपदिकेभ्यो दा प्रत्ययो भवति । त्रलोऽपवादः ।

15. After sarva 'all', eka 'one', anya 'other', kim 'what', yad 'which', and tad 'that', when time is denoted, comes the affix दा, the words being in the locative case.

The word सप्तम्याः V. 2. 10 is understood here and not the word इतराभ्यः of the last. This debars त्रल् ॥ Thus सर्वदा or सदा (V. 3. 6) 'at every time' or 'always', एकदा 'once', अन्यदा 'at another time', कदा (VII. 2. 103) 'when', यदा 'when', तदा 'then'.

Why do we say काले 'when time is denoted'? Observe सर्वत्र देशे (where although the case is the 7th, the affix is not दा, because the sense is) 'in every *place*' or 'every where'.

इदमो र्हिल् ॥ १६ ॥ पदानि ॥ इदमः, र्हिल् ॥

वृत्तिः ॥ सप्तम्या इत्येव । काल इति च । इदमः सप्तम्यन्तात्काले वर्त्तमानाद् र्हिल् प्रत्ययो भवति । हस्यापवादः ॥

16. After idam 'this', ending in the locative case, comes the affix rhil (—र्हि), when time is denoted.

The words सप्तम्याः and काले are understood. This rhil debars ha. The ल् of र्हिल् is for accent. Thus अस्मिन् काले = एतर्हि (V. 3. 4) 'at this time'. Why 'when time is denoted'? Observe, इह 'in this *place*', as इह देशे ॥ See V. 3. 4.

अधुना ॥ १७ ॥ पदानि ॥ अधुना ॥

वृत्तिः ॥ अधुनेति निपात्यते । इदमो ऽशभावो धुना च प्रत्ययः ।

17. The word adhunâ is anomalous, having the same sense.

As अस्मिन् काले = अधुना 'at this time': अश् is substituted for इदम् and, धुना affix is added.

दानीं च ॥ १८ ॥ पदानि ॥ दानीम्, च ॥

वृत्तिः ॥ इदमः सप्तम्यन्तात्काले वर्त्तमानाद्दानीं प्रत्ययो भवति ।

18. The affix dânîm also comes after idam, ending in the locative, and denoting time.

Thus अस्मिन् काले = इदानीम् (V. 3. 3) 'at this time'.

तदो दा च ॥ १९ ॥ पदानि ॥ तदः, दा, च ॥

वृत्तिः ॥ तदः सप्तम्यन्तात्काले वर्त्तमानाद् दा प्रत्ययो भवति चकाराद्दानीं च ।

19. After tad, ending in the seventh case, when time is denoted, comes the affix दा, and also dânîm.

Digitized by Google

The दानीम् is read into the sûtra by force of the word च 'also'. Thus तस्मिन् काले = तदा or तदानीम् 'at that time'. This sûtra, so far as it ordains दा after the word तद् is useless, because the word तद् already takes दा by V. 3. 15.

तयोर्दार्हिलौ च च्छन्दसि ॥ २० ॥ पदानि ॥ तयोः, दा, र्हिलौ, च, छन्दसि ॥

वृत्तिः ॥ तयोरिति प्रातिपदिकनिर्देशः । तयोरिदमः तदश्च यथासंख्यं दार्हिलौ प्रत्ययौ भवत श्छन्दसि विषये । चकाराद्यथाप्राप्तं च ।

20. After these two (nominal stems idam and tad), come respectively the affixes dâ and rhil, in the Chhandas, and also the other affixes.

The affix दा comes after इदम् and र्हि after तद् ॥ Thus इदा (V. 3. 3), तर्हि (VII. 2. 102). So also इदानीम् and तदानीम् ॥ As इदा हि व उपस्तुतिमिदा वामस्य भक्तये (Rig Veda VIII. 27. 11).

अनद्यतने र्हिलन्यतरस्याम् ॥ २१ ॥ पदानि ॥ अनद्यतने, र्हिल, अन्यतरस्याम् ॥

वृत्तिः । छन्दसीति न स्मर्यते । सामान्येन विधानम् । किंसर्वनामबहुभ्यः सप्तम्यन्तेभ्यो ऽनद्यतने कालविशेषे वर्त्तमानेभ्यो र्हिल् प्रत्ययो भवत्यन्यतरस्याम् ।

21. The affix rhil (—⁄ र्हि) comes optionally, in denoting time not of the current day, after the words 'kim, the sarvanâma, and bahu &c.' in the 7th case.

The anuvritti of छन्दसि is not read into this sûtra. This is a general rule. Thus कर्हि or कदा (VII. 2. 103), यर्हि or यदा, तर्हि or तदा ॥

सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः ॥ २२ ॥ पदानि ॥ सद्यः, परुत्, परारि, ऐषमः, परेद्यवि, अद्य, पूर्वेद्युः, अन्येद्युः, इतरेद्युः, अपरेद्युः, अधरेद्युः, उभयेद्युः, उत्तरेद्युः ॥

वृत्तिः । सप्तम्याः कालइति वर्त्तते । सद्यःप्रभृतयः शब्दा निपात्यन्ते प्रकृतिप्रत्यय आदेशः कालविशेषइति सर्वमेतन्निपातनाल्लभ्यते ।

वार्त्तिकम् । द्युश्चोभयाद्वक्तव्यः ॥

22. The following words are anomalous: sadyaḥ, parut, parâri, aishamas, paredyavi, adya, pûrvedyus, anyedyus, anyataredyus, itaredyus, aparedyus, adharedyus, ubhayedyus, and uttaredyus.

The words सप्तम्याः and काले are understood here. The base, the substitute, the affix, the paticular time &c, must all be deduced from these forms. Thus सद्यः is formed from समान, by substituting स for समान, and adding the affix द्यस्; in the sense of 'a day'. समानेऽहनि = सद्यः 'the same day'. The पूर्व and पूर्वतर are replaced by पर, and then the affixes उत् and आरि are added, in the sense of 'a year'. Thus पूर्वस्मिन् संवत्सरे = परुत् 'last year'. पूर्वतरे संवत्सरे = परारि 'the year before last'. The इद replaces इदम्, and affix समसण् is added, in the

Digitized by Google

sense of 'year'. Thus अस्मिन् संवत्सरे = ऐषमः 'during this year'. To पर is added एद्यवि in the sense of 'a day': as, परस्मिन्नहनि = परेद्यवि 'the other day'. The अद्य replaces इदम् and the affix द्यस् is added in the sense of 'a day'. Thus अस्मिन्नहनि = अद्य 'to day'. To the words पूर्व, अन्य, अन्यतर, इतर, अपर, अधर, उभय and उत्तर is added the affix एद्युस्, in the sense of 'a day': as पूर्वस्मिन्नहनि = पूर्वेद्युस् 'on the day before', अन्यस्मिन्नहनि = अन्येद्युस् 'on the following day'. अन्यतरस्मिन्नहनि = अन्यतरेद्युः 'on either of two days'. इतरस्मिन्नहनि = इतरेद्युः 'on another day', अपरस्मिन्नहनि = अपरेद्युः 'on the following day', अधरस्मिन्नहनि = अधरेद्युः 'on a previous day'. उभयोरह्नोः = उभयेद्युः 'on both days'.

प्रकारवचने थाल् ॥ २३ ॥ पदानि ॥ प्रकारवचने, थाल् ॥

वृत्तिः । किंसर्वनामबहुभ्यो ऽद्व्यादिभ्य इति वर्त्तते । सप्तम्याः कालइति निवृत्तम् । सामान्यस्य विशेषो भेदकः प्रकारः । प्रकृत्यर्थविशेषणं चैतत् । प्रकारवृत्तिभ्यः किंसर्वनामबहुभ्यः स्वार्थे थाल् प्रत्ययो भवति ।

23. The affix thâl (—ल् था) comes, after the words kim &c V. 3. 2, when we speak of a kind or manner of being.

The sûtra V. 3. 2, is to be read into this. The anuvṛitti of सप्तम्याः and काले ceases. The word प्रकार means the differentiating quality distinguishing a species among the genus: it means 'sort', 'kind', 'mode', 'manner' &c. Thus तेन प्रकारेण = तथा 'so, in that manner'. Similarly यथा, सर्वथा ॥ The affix जातीयर् taught in V. 3. 69 has also the same force, with this difference that jâtiyar applies to words which denote things possessing such a quality (प्रकारवान्, while thâl denotes mode itself. Therefore, one does not debar the other, so that we have forms like तथाजातीयः, and यथाजातीयः ॥

इदमस्थमुः ॥ २४ ॥ पदानि ॥ इदमः, थमुः ॥

वृत्तिः । इदंशब्दात्प्रकारवचने थमुः प्रत्ययो भवति । थालोपवादः ॥

24. After idam comes the affix thamu (थमु) in the same sense i. e. in denoting manner.

This debars थाल्; thus: अनेन प्रकारेण = इत्थम् V. 3. 4, 'in this manner. The उ in थमु protects the म् from becoming इत् (See I. 3. 4)

किमश्च ॥ २५ ॥ पदानि ॥ किमः, च, थमुः ॥

वृत्तिः । किंशब्दात् प्रकारवचने थमुः प्रत्ययो भवति ।

25. Also after kim, comes the affix thamu in the sense of manner.

Thus केन प्रकारेण = कथम् 'how?'.

था हेतौ चच्छन्दसि ॥ २६ ॥ पदानि ॥ था, हेतौ, च, छन्दसि ॥

वृत्तिः । किंशब्दाद्धेतौ वर्त्तमानात्था प्रत्ययो भवति, चकारात्प्रकारवचने । छन्दसि विषये ।

Digitized by Google

26. The affix था comes in the sense of 'cause' also (as well as 'manner'), in the Chhandas, after the word kim.

The word प्रकार वचने is read into the sûtra by force of च ॥ Thus कथा wherefore? why? for what reason?', कथा 'how'. The former is an example of हेतु 'reason or cause', the second of प्रकार 'manner'. As in the following sentences: कथा मामं न पृच्छसि = केन हेतुना मामं न पृच्छसि ॥ कथा देवा आसन् पुराविदः ॥

Here end the affixes having the designation of Vibhakti.

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः ॥ २७ ॥ पदानि ॥ दिक्शब्देभ्यः,सप्तमी-पञ्चमी-प्रथमाभ्यः, दिक्-देश-कालेषु, अस्तातिः ॥

वृत्तिः । दिशां शब्दाः दिक्शब्दाः तेभ्यो दिक्शब्देभ्यो दिग्देशकालेषु वर्त्तमानेभ्यः सप्तमीपञ्चमी. प्रथमान्तेभ्यो ऽस्तातिः प्रत्ययो भवति स्वार्थे ॥

27. After words of 'direction', ending in the locative, ablative and nominative, and referring to 'direction', 'locality' or 'time', comes the affix astâti (अस्तात्), without change of sense.

The word दिक् शब्दाः means 'words denoting directions'. Thus पुरस्तात् has all these three significations in the following sentences, पुरस्ताद्वसति 'he lives eastward', पुरस्तादागतः 'he came from east' पुरस्तात् रमणीयम् 'It was delightful previously'. Similarly with अधस्तात् ॥

Why do we say 'after words of direction'? Observe ऐन्द्र्यां दिशि वसति॥ Why do we say 'ending in the locative, ablative and nominative'? Observe पूर्वम् ग्रामं गतः ॥ Why do we say when the sense is 'a direction', 'a locality' or 'a time'? Observe पूर्वस्मिन् गुरौ वसति 'he lives in the presence of the guru'.

This affix is a स्वार्थिक affix, like the affixes taught previously. The words denoting direction must be primitive words of direction; and not derivative words like ऐन्द्री &c. which also denote direction. The rule of यथासंख्य does not apply here.

दक्षिणोत्तराभ्यामतसुच् ॥ २८ ॥ पदानि ॥ दक्षिणा-उत्तराभ्याम, अतसुच् ॥

वृत्तिः ॥ दक्षिणोत्तराभ्यां दिग्देशकालेषु वर्त्तमानाभ्यां सप्तमीपञ्चमीप्रथमान्ताभ्यां स्वार्थे ऽतसुच् प्रत्ययो भवति। अस्तातेरपवादः ।

28. After dakshinâ and uttara, (referring to a direction or a locality or a time, and ending with locative, ablative or nominative) comes the affix atasuch (अतस्) ॥

This debars अस्ताति ॥ The word दक्षिणा can never refer to time, so with regard to it direction and locality are only taken. Thus दक्षिणतो वसति, दक्षिणत आगतः, दक्षिणतोरमणीयम् ॥ उत्तरतोवसति, उत्तरत आगतः, उत्तरतोरमणीयम् ॥ The अ of अतस् is for the sake of differentiating this affix from तस् in sûtras like II. 3. 30.

Digitized by Google

विभाषा परावराभ्याम् ॥ २९ ॥ पदानि ॥ विभाषा-पर-अवराभ्याम् (अतसुच्) ॥

वृत्तिः । परावरशब्दाभ्यां विभाषा ऽतसुच्प्रत्ययो भवति अस्तातेरर्थे ।

29. Optionally after para and avara, comes the affix atasuch, in the sense of astâti.

Thus परतः or परस्तात् or अवरस्तात् or अवरतो वसति, आगतः or रमणीयम् ॥

अञ्चेर्लुक् ॥ ३० ॥ पदानि ॥ अञ्चेः, लुक् ॥

वृत्तिः । अञ्चत्यन्तेभ्यो दिक्शब्देभ्य उत्तरस्यास्तातिप्रत्ययस्य लुग् भवति ।

30. After words of direction ending in अञ्चु, there is luk-elision of the affix astâti.

Thus प्राक् or प्रत्यक्; as, प्राच्यां दिशि वसति = प्राग् वसति, प्रागागतः, प्राग्रमणीयम् ॥ The feminine affix of प्राची is also elided, when the taddhita affix is elided by लुक् ॥ See I. 2. 49.

उपर्युपरिष्टात् ॥ ३१ ॥ पदानि ॥ उपरि-उपरिष्टात् ॥

वृत्तिः । उपरि उपरिष्टात् इत्येतौ शब्दौ निपात्येते अस्तातेरर्थे । ऊर्ध्वस्योपभावः रिल् रिष्टातिलौ च प्रत्ययौ निपात्येते ।

31. The word upari and uparishṭât are anomalous in the sense of astâti.

These words are derived irregularly from the word ऊर्ध्व, by changing it into उप, and adding the affixes रिल् and रिष्टातिल् ॥ Thus ऊर्ध्वायां दिशि वसति = उपरि वसति. So also उपर्यागतः, उपरि रमणीयम् ॥ उपरिष्टाद्वसति, उपरिष्टादागतः, उपरिष्टाद्रमणीयम् ॥

पश्चात् ॥ ३२ ॥ पदानि ॥ पश्चात् ॥

वृत्तिः ॥ पश्चादित्ययं शब्दो निपात्यते ऽस्तातेरर्थे । अपरस्य पश्चभाव आतिश्च प्रत्ययः ।

वार्त्तिकम् ॥ दिक्पूर्वपदस्यापरस्य पश्चभावो वक्तव्यः, आतिश्च प्रत्ययः ॥

वा॰ ॥ अर्द्धोत्तरपदस्य दिक्पूर्वपदस्य पश्चभावो वक्तव्यः ॥

वा॰ ॥ विनापि पूर्वपदेन पश्चभावो वक्तव्यः ॥

32. The word paśchât is anomalous, in the sense of astâti.

The word is formed by changing अपर into पश्च, and adding the affix आति ॥ As अपरस्यां दिशि वसति = पश्चाद्वसति, आगतः, रमणीयम् &c.

*Vârt*:—So also when अपर is preceded by another word denoting direction, it is changed into paścha and âti is added. As दक्षिणपश्चात्, उत्तरपश्चात् ॥

*Vârt*:—So also when अर्ध follows such a compound, apara is changed into paścha; as, दक्षिणपश्चार्धः, उत्तरपश्चार्धः ॥

*Vârt*:—Apara is changed into paścha, when followed by ardha, and not preceded by any other word. As, पश्चार्धः ॥

पश्च पश्चा चच्छन्दसि ॥ ३३ ॥ पदानि ॥ पश्च, पश्चा, च, छन्दसि ॥

वृत्तिः ॥ पश्चपश्चाशब्दौ निपात्येते छन्दसि विषये, अस्तातेरर्थे । चकारात्पश्चादित्यपि भवति । अपरस्य पश्चभावो ऽकाराकारौ च प्रत्ययौ निपात्येते ॥

14

Digitized by Google

33. The words paścha and paśchâ are anomalous in the Chhandas, having the force of astâti.

By च, the word पश्चात् is also included. As पुरा व्याघ्रो जायते, पश्च, पश्चा or पश्चात् सिंहः ॥ As पश्चात् पुरस्तादधरादुदक्तात् (Rig Ved X. 87. 21) पश्चेदमन्यदभवद्यजत्रम् (R. V. X. 149. 3).

उत्तराधरदक्षिणादातिः ॥ ३४ ॥ पदानि ॥ उत्तर, अधर, दक्षिणात्, आति ॥

वृत्तिः ॥ उत्तराधरदक्षिणशब्देभ्य आतिः प्रत्ययो भवति अस्तातेरर्थे ।

34. To the words uttara, adhara and dakshiṇa is added the affix âti, in the sense of astâti.

Thus उत्तरस्यां दिशि वसति = उत्तराद्वसति ; उत्तरादागतः, उत्तराद्रमणीयम् ॥ Similarly अधरात् and दक्षिणात् ॥

एनबन्यतरस्यामदूरेऽपञ्चम्याः ॥ ३५ ॥ पदानि ॥ एनप्, अन्यतरस्याम्, अदूरे, अपञ्चम्याः ॥

वृत्तिः । उत्तराधरदक्षिणशब्देभ्य एनप् प्रत्ययो भवत्यन्यतरस्यामस्तातेरर्थे । अदूरे चेदवधिमानवधेर्भवति ।

35. The affix enap (एन्) comes optionally, (after the words uttara, adhara and dakshiṇa, in the sense of astâti,) when the limit indicated is not remote, and when it is not a substitute of the ablative case-affix.

The affix अस्ताति and the other affixes taught above come with the force of locative, ablative and nominative. The एनप् comes with the force of locative and nominative and not that of ablative. The adverbs so formed refer to objects not at a distance. Thus उत्तरेण or उत्तरात् or उत्तरतो वसति or रमणीयम् ॥ Similarly अधरेण, अधरात्, अधस्ताद् वसति &c, so also दक्षिणेन, दक्षिणात्, दक्षिणतो, वसति &c, 'He lives near by in the north-ward or southward'. Why do we say 'when not denoting distance'. Observe उत्तराद्वसति 'he lives far away in the north'. Why do we say 'when not having the force of ablative'? Observe उत्तरादागतः 'come from the north'.

The word अपञ्चम्याः governs all the succeeding sûtras upto V. 3. 39, exclusive. Some do not read उत्तर &c into this sûtra: according to them this is a general rule applicable to all words denoting direction. As पूर्वेण ग्रामम्, अपरेण ग्रामम् (II. 3. 31). The प् in enap is for the sake of accent (III. 1. 4).

दक्षिणादाच् ॥ ३६ ॥ पदानि ॥ दक्षिणात्, आच् ॥

वृत्तिः ॥ अदूर इति न स्वर्यते । अपञ्चम्या इति वर्त्तते । दक्षिणशब्दादाच् प्रत्ययो भवति अस्तातेरर्थे ।

36. The affix âch (आ) comes after the word dakshiṇa, in the sense of astâti, but not as a substitute of the ablative case-affix.

Digitized by Google

The word अवूर of the last sûtra is not read into this: though the word अपञ्चम्याः governs it. Thus दक्षिणा वसति or रमणीयम्, but दक्षिणत आगतः ॥ The च् in आच् is not for the sake of accent (VI. 1. 163) for the simple affix आ would be udâtta by the general rule III. 1. 3. The च् serves the purpose of differentiating this आ from other affixes in Sûtra II. 3. 29.

आहि च दूरे ॥ ३७ ॥ पदानि ॥ आहि, च, दूरे, (आच्) ॥

वृत्तिः । दक्षिणशब्दादाहिः प्रत्ययो भवति अस्तातेरर्थे, चकारादाच् । दूरे चेदवधिमानवधेर्भवति ।

37. The affix âhi (आहि) comes after the word dakshiṇa, in the sense of astâti, as well as âch, when the reference is to a distant limit.

Thus दक्षिणाहि वसति or दक्षिणा वसति 'he lives far away in the south'. Similarly दक्षिणाहि रमनायम्, दक्षिणा रमणीयम् ॥

Why do we say दूरे 'when the adverb denotes a distant limit'? Observe दक्षिणतो वसति ॥ The word अपञ्चम्याः governs this also: as, दक्षिणत आगतः ॥

उत्तराच्च ॥ ३८ ॥ पदानि ॥ उत्तरात्, च, (आच्-आहि) ॥

वृत्तिः । उत्तरशब्दादाजाही प्रत्ययौ भवतः, अस्तातेरर्थे, दूरे चेदवधिमानवधेर्भवति ।

38. The affixes आच् and आहि come after uttara in the sense of astâti; when the reference is to a distant limit.

Thus उत्तरा or उत्तराहि वसति or रमणीयम् "He lives far away in the north: or the northward far away is pleasant". But when 'distance' is not meant we have उत्तरेण प्रयाति ॥ The word अपञ्चम्याः governs this also: as उत्तरादागतः ॥

पूर्वाधरावराणामसि पुरधवश्चैषाम् ॥ ३९ ॥ पदानि ॥ पूर्व-अधर-अवराणाम्-असिः, पुर-अध्-अवः च, एषाम् ॥

वृत्तिः । अपञ्चम्या इति निवृत्तम् । तिसृणां विभक्तीनामिह ग्रहणम् ॥ पूर्वाधरावराणामसि प्रत्ययो भवति अस्तातेरर्थे । तत्सन्नियोगेन चैषां यथासंख्य पुर् अध् अव् इत्येते आदेशा भवन्ति ।

39. After pûrva, adhara and avara comes the affix asi (अस्) in the sense of astâti; and pur, adh, and av are their respective substitutes before this affix.

The word अपञ्चम्याः does not govern this sûtra. Thus पुरो वसति, पुर आगतः, पुरो रमणीयम् ॥ Similarly अधस् and अवस् with वसति, आगतः and रमणीयम् ॥ As अधोवसति अध-आगतः, अधोरमणीयम्, अवोवसति, अवआगतः and अवोरमणीयम् ॥

अस्ताति च ॥ ४० ॥ पदानि ॥ अस्ताति, च ॥

वृत्तिः । सप्तम्यन्तमेतत् । अस्तातिप्रत्यये परतः पूर्वादीनां यथासंख्यं पुरादय आदेशा भवन्ति ।

40. The same substitution takes place when the affix astâti (अस्तात्) follows.

Digitized by Google

That is पुर् for पूर्व, अध् for अधर and अव् for अवर ॥ This sûtra indicates by implication that the affix अस्ताति V. 3. 27 is not debarred by अस् after these words. Thus पुरस्तात् or अधस्तात् or अवस्तात् वसति or आगतः or रमणीयम् ॥

विभाषा ऽवरस्य ॥ ४१ ॥ पदानि ॥ विभाषा, अवरस्य ॥

वृत्तिः ॥ पूर्वेण नित्ये प्राप्ते विकल्प उच्यते । अवरस्यास्तातौ परतो विभाषा अव् इत्ययमादेशो भवति ॥

41. The substitution of अव् for अवर is optional when astâti follows.

This declares option when by last it was compulsory. As अवरस्तात् or अवस्तात् वसति आगतः, or रमणीयम् ॥

संख्याया विधार्थे धा ॥ ४२ ॥ पदानि ॥ संख्यायाः, विधार्थे, धा ॥

वृत्तिः ॥ संख्यावाचिभ्यः प्रातिपदिकेभ्यो विधार्थे वर्त्तमानेभ्यो धा प्रत्ययो भवति स्वार्थे । विधा प्रकारः सर्वं क्रियाविषय एव गृह्यते । क्रियाप्रकारे वर्त्तमानायाः संख्याया धा प्रत्ययः ॥

42. The affix dhâ (धा) comes after a nominal-stem denoting a Numeral, when it means the mode or manner of an action.

The word विधा and प्रकार have the same meaning. The adverbs so formed apply to every kind of action. Thus एकधा भुङ्क्ते 'he eats once'. द्विधा गच्छति 'he goes twice'. Similarly त्रिधा, चतुर्धा, पञ्चधा ॥

अधिकरणविचाले च ॥ ४३ ॥ पदानि ॥ अधिकरण-विचाले, च, ( धा ) ॥

वृत्तिः ॥ संख्याया इत्येव । अधिकरणं द्रव्यं, तस्य विचालः संख्यान्तरापादनम् । एकस्यानेकीकरणमनेकस्य वा एकीकरणम् । अधिकरणविचाले गम्यमाने संख्यायाः स्वार्थे धा प्रत्ययो भवति ॥

43. The affix dhâ comes after a numeral, when the sense is a change in the apportionment or distribution of substances.

The word संख्यायाः is understood here. The word अधिकरणं means 'matter, stuff, substance'. विचालः 'change in numbers'. Thus to make one into many, or to make many into one. Thus एकं राशिं पञ्चधा कुरु 'divide one heap into five'. अष्टधा कुरु, अनेकमेकधा कुरु ॥

एकाद्धो ध्यमुञन्यतरस्याम् ॥ ४४ ॥ पदानि ॥ एकात्-धः, ध्यमुञ्-अन्यतरस्याम् ।

वृत्तिः । एकशब्दात्परस्य धाप्रत्ययस्य ध्यमुञादेशो भवत्यन्यतरस्याम् ।

44. After the word eka the substitute dhyamuñ (±/—ध्यम्) comes optionally instead of dhâ.

Thus एकधा राशिं कुरु or ऐकध्यं कुरु; एकधा भुङ्क्ते or ऐकध्यं भुङ्क्ते ॥ The repetition of धा in the sûtra shows that the substitution takes place when the sense is that of विधा, as well as when it is that of अधिकरण विचाल ॥ Had धा not been repeated, the substitution would have come in the sense of अधिकरण विचाल only, as immediately preceding this sûtra.

Digitized by Google

द्वित्र्योश्च धमुञ् ॥ ४५ ॥ पदानि । द्वित्र्योः, च, धमुञ् ॥
वृत्तिः । धा इत्यनुवर्त्तते । द्वित्र्योः संबन्धिनो धाप्रत्ययस्य विधार्थेऽधिकरणविचाले च विहितस्य धमुञादेशो भवत्यन्यतरस्याम् ।
वार्त्तिकम् । धमुञन्तात्स्वार्थे डदर्शनम् ॥

45. The substitute dhamuñ (±ˡ—धम्) comes optionally, in the place of धा, after the words dvi and tri.

Here also it comes in both the विधार्थ and अधिकरण विचाल senses. By च, the word 'optionally' is drawn into the sûtra. Thus द्विधा or द्वैधम्, त्रिधा, or त्रैधम् ॥

*Vârt*:—The affix ड (ḍa, with the elision of the final vowel) comes without changing the sense, after words ending in dhamuñ. As द्वैध, त्रैध, in पथि द्वैधानि संश्रयन्ते, मति त्रैधानि संश्रयन्ते ॥

एधाच्च ॥ ४६ ॥ पदानि ॥ एधात्, च ॥
वृत्तिः । द्वित्र्योः संबन्धिनो धाप्रत्ययस्य एधाजादेशो भवत्यन्यतरस्याम् ।

46. The substitute edhâch (एधा) comes optionally in the place of dhâ, after dvi and tri.

Thus द्वेधा (VI. 4. 148) or द्वैधम् or द्विधा, त्रेधा, त्रैधम् or त्रिधा ॥

याप्ये पाशप् ॥ ४७ ॥ पदानि ॥ याप्ये-पाशप् ॥
वृत्तिः । याप्यः कुत्सित उच्यते । याप्य वर्त्तमानात्प्रातिपदिकात्स्वार्थे पाशप् प्रत्ययो भवति ।

47. The affix pâśap (पाश) denotes something as insignificant.

The word याप्य means 'contempt, trifling' &c. Thus याप्यो वैयाकरणः = वैयाकरणपाशः 'a very bad Grammarian'. So also याज्ञिकपाशः ॥ Of course this will not come in denoting a person who is a good Grammarian, but bears bad character, or who is a good performer of sacrifices but immoral.

पूरणाद्भागे तीयादन् ॥ ४८ ॥ पदानि ॥ पूरणात्, भागे-तीयात्, अन् ॥
वृत्तिः । पूरणप्रत्ययो यस्तीयस्तदन्तात्प्रातिपदिकाद्भागे वर्त्तमानात्स्वार्थे ऽन् प्रत्ययो भवति ।

48. After (a nominal stem being) an ordinal number ending in tîya, comes the affix अन् (ˡ—अ), (the word retaining its denotation), when a 'part' is meant.

This sûtra is made only to teach accent, for the word to which अन् is added undergoes no other change of form except in accent. Thus द्वितीयः (V. 2. 54) has udâtta on ती (III. 1. 3) but when अन् is added, the accent falls on द्वि (VI. 1. 197). Thus द्वितीयो भागः = द्वितीयः 'the moiety'. Similarly तृतीयः 'the one-third'. Why do we say when 'part' is meant? Otherwise, there is no change in accent. The affix तीय always comes in forming ordinal numbers and for no other purpose, for the तीय in words like कुलतीय is not significant as it is not an

Digitized by Google

affix. The employment of the word पूरण in the aphorism is useless for the purposes of this sûtra. Its anuvritti, however, runs in the other sûtras, and that is the only purpose that it serves here.

प्रागेकादशभ्यो ऽच्छन्दसि ॥ ४९ ॥ पदानि ॥ प्राक्, एकादशभ्यः, अछन्दसि (अन्)॥
वृत्तिः । पूरणाद्भागइत्येव । प्रागेकादशभ्यः संख्यावाचिभ्यः पूरणप्रत्ययान्तेभ्यो भागे वर्त्तमानेभ्यः स्वार्थे ऽन् प्रत्ययो भवति अच्छन्दसि विषये ।

49. After an ordinal numeral upto eleven exclusive, comes the affix अन्, the word retaining its denotation, when a 'part' is meant: but not so in the Chhandas.

This is for accent also. Thus चैतुर्थः, पैञ्चमः, सैप्तमः, नैवमः, दैशमः ॥ Why do we say प्रागेकादशः 'before eleven'? Observe एकादर्शः, द्वादशः no change of accent (VI 1. 223). Why do we say 'not in the Chhandas'? Observe, पञ्चममिन्द्रियस्यापाक्रामत (पञ्चमँ has acute on the final being formed by डट् preceded by मट् V. 2. 48, 49).

षष्ठाष्टमाभ्यां ञ च ॥ ५० ॥ पदानि ॥ षष्ठ-अष्टमाभ्याम्, ञ, च ॥
वृत्तिः ॥ भागइत्येव । अच्छन्दसीति च । षष्ठाष्टमाभ्यां भागे ऽभिधेये ऽच्छन्दसि विषये ञः प्रत्ययो भवति ।

50. The affix ña (±'—अ) also comes as well as अन्, after shastha and ashtama, when a 'part' is meant, but not in the Chhandas.

The words भागे and अछन्दसि are understood here. By च, the affix अन् is included. Thus षैष्ठः or षाँष्ठः, अँष्टमः or आँष्टमः ॥

मानपश्वङ्गयोः कन्लुकौ च ॥ ५१ ॥ पदानि ॥ मान-पशु-अङ्गयोः, कन्-लुकौ, च ॥
वृत्तिः ॥ भागइत्येव । षष्ठाष्टमाभ्यां यथासंख्यं कन्लुकौ च भवतो मानपश्वङ्गयोर्भागयोरभिधेययोः । षष्ठको भागो मानं चेत्तद्भवति । अष्टमो भागः पश्वङ्गं चेत्तद्भवति । कस्य लुक् । ञस्य लुक् अनो वा । चकारा-द्यथाप्राप्तं च ॥

51. After the words shashtha and ashtama there may come respectively कन् (/—क) and लुक् elision of the affix, when the meaning is a division of a measure called mâna or grain, or the part of the body of a beast respectively.

The word मान means a grain weight (व्रीहि परिमितं सुवर्ण). That is to say, कन् comes after षष्ठ when a division of मान 'measure' is expressed; and लुक् comes after अष्ट when a part of पश्वङ्ग is denoted. Thus षैष्ठको भागः 'a sixth of a grain measure'. अष्टमो भागः 'an-eighth part of the body of a beast'. The लुक् here takes the place of the affix ञ as well as अन् ॥ By च, the affixes above mentioned are also employed: as षाष्ठः or षष्ठः, आष्टमः or अष्टमः ॥ When a measure or the body of an animal is not denoted, this rule (though optional) will not apply.

Digitized by Google

एकादाकिनिच्चासहाये ॥ ५२ ॥ पदानि ॥ एकात्, आकिनिच्, च, असहाये ॥
वृत्ति ॥ एकशब्दादसहायवाचिनः स्वार्थे आकिनिच् प्रत्ययो भवति । चकारात्कन्लुकौ च । आकिनिचः कनो वालुग्विज्ञायते ।

52. After the word eka, comes also the affix âkinich (आकिन्), (the word retaining its denotation), when the sense is 'without a companion'.

By the word च, the affix कन् and the elision लुक् also take effect: the elision being of कन् or आकिनिच् ॥ Thus एकाकिन् (nom. एकाकी), एककः or एकः ॥ By using असहाय, it is indicated that the word एक here is not a numeral meaning 'one', but a noun meaning 'alone'. एकोऽन्यार्थे प्रधाने च, प्रथमे, केवले तथा ॥ साधारणे, समानेऽल्पे, संख्यायां च प्रयुज्यते ॥ So that this word will have dual एकाकिनौ, and the plural एकाकिनः ॥

भूतपूर्वे चरट् ॥ ५३ ॥ पदानि ॥ भूत पूर्वे, चरट् ॥
वृत्तिः ॥ पूर्वं भूत इति विगृह्य सुप्सुपेति समासः । भूतपूर्वशब्दोऽतिक्रान्तकालवचनः । प्रकृतिविशेषणं चैतत् । भूतपूर्वत्वविशिष्टेऽर्थे वर्त्तमानात्प्रातिपदिकात्स्वार्थे चरट् प्रत्ययो भवति ॥

53. The affix चर (with the feminine in ङीप्) comes, after a nominal stem, the word retaining its denotation, when the meaning is 'this had been before'.

The word भूतपूर्व is a compound of पूर्व and भूत: the compounding being by सुप्सुपा, and denotes something done in a past time. Thus आढ्यो भूतपूर्वः = आढ्यचरः 'once opulent'. सुकुमारचरः ॥ The ट् indicates that the feminine will be in ङीप्, as, आढ्यचरी ॥ The च् is not इत् in चरट् though required by I. 3. 7. This proves that चुटू rule is anitya. The sûtra V. 2. 18 might have been read after this, with the saving of the word भूतपूर्वः, but then खञ् would have debarred चरट् which is, however, not intended.

षष्ठ्या रूप्य च ॥ ५४ ॥ पदानि ॥ षष्ठ्याः, रूप्यः, च ॥
वृत्तिः ॥ षष्ठ्यन्तात्प्रातिपदिकाद्रूप्यः प्रत्ययो भवति चकाराच्चरट् च ॥

54. After a nominal-stem ending in the sixth-case, comes the affix रूप्य, and also चरट्, in the sense of 'having belonged formerly to somebody'.

The word भूतपूर्व here qualifies the sense of the affix, and not the sense of the base, as it was in the last sûtra. Thus देवदत्तस्य भूतपूर्वो गौः = देवदत्तरूप्यः 'the cow that formerly belonged to Devadatta'. Similarly देवदत्तचरः ॥

अतिशायने तमबिष्ठनौ ॥ ५५ ॥ पदानि ॥ अतिशायने, तमप्, इष्ठनौ ॥
वृत्तिः ॥ अतिशयनमतिशायनं, प्रकर्षः । निपातनाद्दीर्घः । प्रकृत्यर्थविशेषणं चैतत् । अतिशायनविशिष्टेऽर्थे वर्त्तमानात्प्रातिपदिकात्स्वार्थे तमबिष्ठनौ प्रत्ययौ भवतः ॥

Digitized by Google

55. When the sense is that of surpassing, there come the affixes तमप् (तम्) and इष्ठन् ( ⁄ — इष्ठ), after a nominal stem, the word retaining its denotation.

